A. K. SEN

## Choice of Techniques

***An Aspect of the Theory of Planned Economic Development***

*THIRD EDITION*

For the new edition the author has added an Introduction. In it the question of choice of techniques has been related to a number of associated problems in investment planning, especially in the light of recent discussions on optimal allocation. *Rs 12.50*

JOHN A. KING

## Economic Development Projects and their Appraisal

***Cases & Principles from the Experience of the World Bank***

The World Bank has accumulated a vast store of experience in appraising the merits of different kinds of development projects in all parts of the world. This volume makes some of this experience available in the form of cases—17 dealing with electric power projects, 9 with transportation projects, and 4 with industrial projects—in 23 different countries.
*Johns Hopkins Afro-Asian edition $7.50*

ASHOK V. DESAI

## Real Wages in Germany 1871-1913

This book makes an important contribution to the long-period historical statistics of Germany by furnishing comprehensive series of industrial wages and the cost of living for 1871-1913. *55s*

**OXFORD UNIVERSITY PRESS**

AP
B 99
UN529
J
73

# Journal OF THE University of Bombay

**ARTS–HUMANITIES AND SOCIAL SCIENCES**

**Vol. XXXVII (New Series) Number 73, OCTOBER 1968**

CONTENTS

ARTICLES

| | | |
|---|---|---|
| आचार्यविजयः a/s आचार्यविजयाख्यानम्। By श्रीपरमेश्वर कविकण्ठीरवः ... | W. R. Antarkar ... ... | 1 |
| The Goddess Sarasvati in Sanskrit Literature ... ... ... ... | (Kum.) G. V. Davane ... | 70 |
| The Relation of Prākrit Studies to Other Subjects in Humanity and Indian Languages, History and Philosophy, etc. ... ... | P. M. Upadhye ... ... | 78 |
| Naming and Meaning... ... ... | (Smt.) Veena Gajendragadkar ... | 86 |
| The Concept of Organic Unity in Art Criticism ... ... ... | R. B. Patankar ... ... | 107 |
| Indian Linguistics-1968 ... ... | S. N. Gajendragadkar ... | 121 |
| Tristram Shandy and the Association of Ideas ... ... ... ... | S. Ookerji ... ... ... | 137 |
| The Grant Road Theatre-1846-1860 | (Smt.) Kumud Mehta ... | 152 |
| The Role of Forced Saving in Indian Economic Development ... | A. Vasudevan ... ... | 177 |
| Integral Anthropology and the Principle of Proportionality ... | J. V. Ferreira ... ... | 197 |
| Roots of Authoritarian Elements in the Indonesian Presidency ... | (Kum.) Satyavati S. Jhaveri ... ... | 218 |

| | | |
|---|---|---|
| Problems of the Police in the Area of Crowd Control and Violence, also Difficulties in Relation to the Officials and Politicians ... | R. K. Hooda ... ... | 229 |
| Maharashtra and Congress Party 1962-67 ... ... ... ... | R. Srinivasan ... ... | 254 |
| The Social Background of Students in the Colleges of South Gujarat | S. D. Patel ... ... ... | 278 |
| Bombay Civic Election of 1968 ... | G. S. Badhe and M. U. Rao | 287 |
| A Journal of Our Intended Voyage | J. Humbert, s.j. ... ... | 308 |
| Genesis of Islam in South India: Its Direct Contact with Arabia ... | A. Cherian ... ... ... | 341 |


REVIEWS


| | | |
|---|---|---|
| Caurapañcāśikā of Bilhanakavi ... | M. D. Paradkar ... ... | 367 |
| The Seers of the Ṛgveda ... | M. S. Bhat ... ... ... | 368 |
| Late Pundit MM. Śrīdhara Śāstri Ware ... | S. G. Desai ... ... | 370 |
| The Fading Commonwealth ... ... | S. P. Aiyar ... ... ... | 374 |
| Pakistan, the Formative Phase ... | S. P. Aiyar ... ... ... | 375 |
| Non-Violence and Aggression ... | (Kum.) Usha Mehta ... | 377 |


AS
472
B753
73

# INTRODUCTION

THE third biography of Srī Śaṅkarācārya to be published is Ācāryavijaya or Ācāryavijāyākhyāna by Śrī Parameśvara Kavikaṇṭīrava. The present edition of the work is based upon a transcript copy of the ms. of the same, belonging to the new Viśva Bhāratī Collection of mss. made by the Adyar Library, Madras. This copy is also not free from mistakes altogether. The comparer has tried to make corrections wherever possible. We have also tried to do so by way of splitting up or joining syllables according to the rules of Sandhi to distinguish the different words properly, so as to make proper sense but without altering the text otherwise. We have suggested better readings, which have been given in the foot-notes and tried to fill up the gaps wherever possible. Such cases have, however, been comparatively few. Beyond this, the text has been left untouched. Even after all such corrections, the text is unintelligible at a number of places. The veracity of the text seems doubtful in many places, such as II : 78, para 2 (निरुद्धदभ्रक°), III : 9, (इढावर्थं°), III : 37, line 2, III : 62 : a, III : 100 : b (कम्पस्वेदादिदूरौ ।) &c. In some cases, the metre is also doubtful. Thus, sometimes, one syllable is less (I : 57, I : 81, II : 79-one matra also less, III : 120 and V : 7 : a) and sometimes two (II : 85, V : 3, 17) while at times, we have a syllable in excess (III : 135, IV : 46a) or even one matra more (V : 17 : c—चगप्ब्रह्म) and so on.

A peculiar thing to be noted is the repetition of a number of stanzas in chapters IV and V as follows :—

Chapter IV : stanza no. 50 = stanza 61
Chapter IV : stanza no. 51 = stanza 62
Chpater IV : stanza no. 53 = stanza 59
Chapter IV : stanza no. 54 = stanza 60
Chapter IV : stanza no. 75 = Ch. V : stanza 12.
Chapter V : stanzas 3 to 6 = Chapter V : stanzas 17 to 20.

A few prose passages are also found to be repeated, though with slight variations, all in chapters IV and V, e.g. the passage अथ तदानों उदयमानो...साकूतमिद° after st. 49 and the same passage after st. 58— both in chapter IV. Similarly, the passage इति पाराशरिकरिण: फणिति after st. 5 and after st. 19 of chapter V (A).

Another thing to be noted is that in chapter V, the poet describes to us the return of Śrī Śaṅkarācārya from the body of Amarūka, after being aroused by his disciples by means of a song and the subsequent events upto Maṇḍana being initiated into Sannyāsa and given the fresh name Sureśvara. Immediately thereafter, the story is restarted that the disciples were worried because Śrī Śaṅkarācārya had not returned even though the stipulated period was over and hence, Padmapāda appointed someone to guard the body of their Master and himself went out in search of him. The ms. is incomplete and breaks off at this stage. The repetition pertains to the story and not to the text. Anyhow, it is not understood.

Chapter V is, as stated above, incomplete but internally also, it seems to have two beginnings. After the first twenty stanzas, we have another salutation, viz. श्रीगुरुभ्यो नमः। वन्दे &c. The story is, however, continued. For the sake of convenience of understanding, therefore, these two parts have been shown by us as A & B, though no such distinction has been made in the copy in our hands. The repetition of the story referred to in the last paragraph occurs in the second part of this Chapter V.

## AUTHOR

The colophons at the end of the chapters give the name of the poet as Śrī Parameśvara Kavikaṇṭhīrava. Besides the colophons, stanzas 1 to 11 of the first chapter are the only ones to give some little information about the author. It may be stated as follows :—

The poet's father was called Śrī Devarāja, who seems to have been a highly spiritually minded person ( ब्रह्मज्ञानपर stanza 5 ) and also an erudite scholar ( विश्वजनीनविद्य- stanza 6). He was the very home of forgiveness (क्षान्त्यालय) and far-famed and was always surrounded by disciples. To our poet, the father was also his preceptor. Both of them ssem to have belonged to the Sankṛti Gotra—rather an unusual name. The very first stanza of the poem offers salutation to Śrī Rāma while stanza 10 invokes Dāśarathī (Rāma) to confer blessing upon the poet. From this, we can infer Legitimately that the poet was a devotee of Sri Rāma. Regarding his personal attainments, the poet is quite apologetic and claims no special proficiency in grammar, logic or the art of poetry. The name of the work is given in the colophons is Ācāryāvijayā-khyāna while stanza 8 of the first chapter gives it as Ācāryavijaya.

## DATE :

During the first ten stanzas, the poet refers to two persons, viz. Mādhava (and his work Mādhavīya) and Appayyā Dīxit. Mādhava is Śrī Vidyāraṇya Muni and Mādhavīya is Śānkara digvijaya. As per our findings, Mādhava's date ranges from 1650 A.D. to 1800 A.D. Apayyā Dīxit is generally assigned to the 17th century A.D. Our author is, therefore, decidedly later than these two writers and hence cannot be assigned to any period earlier than the 18th century.



## NATURE OF THE WORK :

As stated in the work itself, the work is a Campū-Kāvya (ch. I : stanza & 8 the colophons) i.e. a mixture of prose and poetry. It states clearly that it follows the Mādhavīya i.e. Śāṅkardigvijaya of Śrī Vidyāraṇya Muni. No other previous biographer of Śrī Śaṅkarācārya has been referred to in the work. It is evident throughtout that the version follows faithfully the one given in the work of Mādhava. (It is to be noted that we have given the equation of माधव and माधवीय with श्रीविद्यारण्य and शां°दि° as per current popular belif. Our view in the matter is different).

The work is divided into Taraṅgas and the end of each Taraṅga is marked by a common stanza with a variation in the last line only. The poetry part is written in different metres like Anuṣṭubha (I : 1, 8, II : 13, III : 81-84), Āryā (I : 73, II : 19, 23, 25, III : 54, 77), Vasantatilakā (I : 59, 70, II : 1), III : 10, 72, 80, IV. 34, 35, 42, 43), Mālinī (II : 2, 3, 42, 43, III : 114), Mandākrāntā (I : 38, II : 5) Drutavilambita (II : 94, III : 12), Sragdharā (1 : 17, 18, II : 28, 60, III. 28, 120), Sikhariṇī (II : 45, 47, 77), Prthvī (II : 76, 78, III : 18, 104, IV : 15, 18, 37). All these metres have been used occassionally while those that are used frequently are Indravajrā, Upendravajrā and Śārdūlavikrīdita. Quite a few stanzas are very artificial in composition and very awkward for recitation.

The prose part greatly resembles in style that in the work of Vallīsahāya, the author of another biography of Śri Śaṅkarācārya, viz., Ācāryavijayacampu. It is highly elaborate and extremely artificial. Many a time, we are reminded of Bāṇabhaṭṭa though the style is bereft of Bāṇa's elegance and grace. In his passion to imitate that style, our poet seems to have lost sight of the sense of prspriety also. Compounds run over many lines and are fashioned out of an unusual set of words. He seems to be inordinately fond of the sound-effect of words and to secure that, he goes out of his way almost at every possible step and uses a very recondite vocabulary for the purpose. Instances of such contrived sound or the musical effect will be found almost in very prose passage and practically in every stanza. In short, the style is very highly artificial, forced and laboured and even lacks a sense of proportion and propriety, thereby scarificing substance for form.

Such a work cannot be exepected to give us much of true history and the work actually does not. On his own statement, the author has followed the work of Mādhava, whom he seems to respect very highly. Mādhava's work is itself of highly questionable authenticity, full of anachronisms as it is and as such, a work which mainly follows such a doubtful authority, cannot be expected to be authoritative itself. Moreover, the story is so much overlaid with artificial poetry that the poet seems to be more interested in its poetical aspect than in the historical, with the result that the latter has become subordinate to the former. On the whole, the author has followed Mādhava closely though with slight variations, which have been noted by us in the foot-notes. The work, however, cannot com- mand better respect than the work of Mādhava.

(*a*) Ch. I: para 2 after st. 43 :—This suggests that the brahmins divined the contents of the jar to be Śeṣaśāyī Viṣṇu with the help of their own penance. According to Mādhava, Tirumala Dīxit and Brahmānanda Sarasvatī, the only biographers to mention this story, it was the Sun-God who directed them to declare the contents to be Viṣṇu, lying on the serpent's couch.

(*b*) Ch. I: after st. 46 :—This poet identifies Rājaśekhara with Sudhanvā. No other biographer has done it. Just a little later, after st. 52, this Rājasekhara has been referred to as the king of Kāñcī while at II: 31, one Rājaśekhara has been described as the king of Kerala.

(*c*) Ch. I: st. 85 :—Here, Padmapāda is said to be born of Padmanābha i.e. Viṣṇu. A little later (after st. 88), Sanandana is said to be born of Bhāskara i.e. Sun-god. As a matter of fact, Sanandana and Padmapāda are one and the same person. Other biographers have also been guilty of such lapses while describing the births of Śrī Śaṅkarācārya's disciples and other characters.

(*d*) Ch. II: st. 50: line 2 :—It is to be noted that the poet omits any reference to the question about Śrī Śaṅkarācārya's life-span by his mother and the answer thereto by the sages. The other biographers, Mādhava, Tirumala Dīxit, Sadananda and Nīlakaṇṭha describe that part of the story also. There is also no discussion between Śrī Śaṅkarācārya and his mother regarding the former becoming a Sannyāsin.

# आचार्यविजयः *a/s* आचार्यविजयाख्यानम् ।

BY

**श्रीपरमेश्वर ,कविकण्ठीरव**

*Edited by*

W. R. ANTARKAR

**॥ अथ श्रीपरमेश्वरकविकण्ठीरवकृत आचार्यविजयः ॥**

**(॥ अथ प्रथमस्तरङ्गः ॥)**

शुभमस्तु । श्रीगुरुभ्यो नमः ॥

श्रीरामाम्बुमुचेऽक्षीणकरुणामृतवर्षिणे ।
अज्ञानतापं हरते नमोवाकमधीमहि ॥ १ ॥
निष्प्रत्यूषमहं स्तवीमि भगवन्तं तं नितान्तं गुरुम् ।
प्राचीनं जगतीह यस्य सुमनःकोटीरकोटी स्फुरत् ।
आस्ते निस्तुलमुत्सवादुपनिषच्छाखीन्द्रशाखाशिखा- ।
प्रत्यग्रप्रतिभा...पल्लवशिरस्थास्नुप्रसूनं नखम् ॥ २ ॥
यः स्वामी विबुधस्तुतः कुवलयामोदावहालङ्कृति- ।
भंद्रारोहणचातुरीपरिचितो मद्रंकरः शङ्करः ।
निष्प्रत्यूहमहर्दिवं दिविषदामानन्दकन्दं दया- ।
पाथोधिः परिवर्धयञ्जयति सः स्तुत्यापि नस्तुष्यतु ॥ ३ ॥
श्रीकण्ठांशमशेषदिग्वरवधूकर्णावतंसीभव- ।
त्कीर्तिस्तोमपराजितेन्दुमहिमस्थेमानमामोदतः ।
क (भ?) र्ता अप्पयदीक्षितं कृतनुतौ यं कर्म कुर्वन्त्यधि- ।
ष्ठेयान्मे हृदयं सहस्रघृणिभाक् सोऽयं घृणावारिधिः ॥ ४ ॥
कीर्तिर्यस्य समस्तलोकविरसद्रूपान्तरोच्छेदिनी ।
क्षुभ्यत्क्षीरपयोधिमध्यविलसड्डिण्डीरगर्वापहा ।
संख्यावत्प्रवरं महेश्वरनिभं क्षान्त्यालयं तं गुरुम् ।
ब्रह्मज्ञानपरं नमामि पितरं श्रीदेवराजाभिधम् ॥ ५ ॥
श्रीमत्संकृतिगोत्रदुग्धजलधौ य.....जातायते ।
यं वा विश्वजनीनविद्यमतुलं प्रख्यापयन्ति क्षितौ ।
अन्तेवासिभिरावृतं गुरुवरं श्रीदेवराजाभिधम् ।
तं वन्दे परमेश्वरो मलिनधीसंक्षालने तत्परम् ॥ ६ ॥

श्रीमाधवो यः कृतशङ्करस्तुतिम्[1] ।
द्विजेन्दसंपूजितपादपङ्कजेन्द्रः ।
श्रुतिप्रमोदामृतदायिवैभवः ।
भव्याय नित्यं मम बोभवीतु ॥ ७ ॥
श्रीमाधवीयमालोच्य क्रियतेऽद्य मयाऽनघम् ।
आचार्यविजयाख्याकं चम्पुकाव्यं मुदेऽस्तु वः ॥ ८ ॥
यद्यप्यत्र दयाविहीनहृदया दृष्ट्वा पुरोभागिनः ।
निन्दन्त्येव कृतिं विशुद्धचरितालंकारिकां मामिकाम् ।
नास्त्यन्त....नन्तशान्तिनिलयस्वान्तास्तु सन्तस्तथा- ।
प्यत्यन्तं शृणु भो मनो न विचिकित्सा तेऽत्र भूयात्सखे ॥ ९ ॥
नाहं व्याकरणाध्वनीनधिषणस्तर्कादिविद्याचणः ।
नो काव्यादिपटुर्न चापि कवितां शक्नोमि कर्तुं कथम् ।
मोहाच्छङ्करसद्गुरोर्गुणगणान् शुद्धान् स्तवीतुं पुनः ।
भो भो दाशरथे प्रवर्तमचिरात्कृस्नं पटुं त्वं गतिः ॥ १० ॥
ओजायन्ते दुर्बलाः किं विवर्णाः । किं व्यासन्त्युद्वाहवन्त्यत्र खर्वः ।
किं मादृक्षां कोविदन्त्यश्यनुत्याम् । किं वा त...द्रो ममन्त्रैस्तु वक्ता ॥ ११ ॥

एकदा कलियुगादौ सर्वे मखभुजः दिक्पालकमौलिकोटिविलसन्मणिकोटिसहचर-संफुल्लमल्लिकादिकुसुमतल्लरजो......जजरीजृम्भन्नवरकिरणपुञ्जमञ्जुलपदकमलं कमला लयानिलयभवल्लोचनोत्पलद्वन्द्वं वन्द्य (जनोपक्रमिक) जनोपक्रमितविक्रमक्रमबल ...... निबिडतरोदःकडाहं जहंभावेन.....नैपुणहाहाप्रमुखगायकगणपाणिरणितविपञ्चीनिक्कणश्र-वणकृतादरणश्रवणं रावणहंसक......मेनकादिनितम्बिनीनिजनर्तनविलोकनलोलुभं लोलंभ-तया.......सुरम्भारम्भापरिरम्भसंकलितकुङ्कुमचन्दनपङ्कामोदनास्वादनासक्तिसंगत....... भृङ्गसङ्गतशङ्काकरहुलीकसदृक्षाक्षिवलयं वलयझणत्कारात्तगन्धगन्धर्वसङ्गीत-सरामणीयकरमणीमणि (नि?) करसरोजातजातवितानस्थलव्यज......तजनितपवनडिम्भा-पहृतश्रमडम्भाडम्बरमम्बरचरनिकुरम्बसंस्तूयमानस्वकीर्तिमण्डलसंवलितजगन्मण्डलमण्डन भूतपण्डितपुण्डरीकभूसुरकृतपौण्डरीकसवनवनदवदहनीभूतवलासुरप्रमुखपरिपन्थिगर्वसर्व-कषदम्भोलिनिराकृतोपद्रवमाणं पुरं......ष्टरमिदमभाषिषत ॥

त्रिविष्टपपते, वेदसंमतमतपरित्यागिनो गहनगणा इव सरमादिदुर्गस्थानरसवाद-विशेषा इव दुर्वर्णाश्रिता अहितुण्डिका इव भुजङ्गमार्गान्वेषणपरा महिषा इव वाडव-विद्वेषिणोऽध्वरमुन्मूलयन्तः सर्वज्ञसंज्ञा नास्तिका विश्वंभरातलमभिवहन्ति किल समन्तात्। अतः

अरुणा......र्चितचरणं करुणावारा......पार्वतीरमणम् ।
कर........जगतः शरणं मरणविहीन......गमिष्यामः ॥ १२ ॥

१. °स्तुतिः? ।



इति निवेदितचित्तवृत्तिषु वृन्दारकेषु तथेति निश्चक्रमिषुः दिवस्पतिर्बृहस्पतिमवोचत् । भगवन् वाचस्पते, भवानीवल्लभं दिदृक्षवो वयमतो भवानप्याढौकतामिति । ततः प्रथिता दिविषदो......शेषप्रायविषादाः कैलासमहीध्रप्रस्थसमीपस्थविस्तारे प्रस्थरसंस्थित-प्रथमस्तोमप्रक्रमितनवनवीभूतनवन (?) निःस्वनश्रवणजनितसन्तोषोज्जृम्भमाणबाष्पकण-काणीभवदीक्षणाः क्षणं स्थिरतास्थिमिताः कथमपि तटप्रान्तभुवं विविधविटपिच्छायामपि विच्छायां चक्रुः ॥

ततश्च विततदीधितिजातदेदीप्यमाने रजतपर्वते विस्तृतसोपाने सरणिरमणीयं तोरणं प्रतीहार.......ण्यासमतीत्य विनिन्दितनन्दिनो भगवन्तं सुपर्णाभिवन्दितमप्य-पर्णाभिवन्दितंत्वात् हिमालयासक्तमपि अहिमालयासक्तं, विनायकामोदितमप्यविनाय-कामोदित......शमप्यनन्तके नन्दित्रातारमपि नदीनत्रातारमष्टमूर्तिमप्यनष्टमूर्तिं पिनाकिनं नाकिनोऽभ्यष्टुवन् ॥

फालाक्षणा त्रिपुरं च मन्मथमकार्षीत्......यः पुमा- ।
न्याम्नायैरखिलैः पुराणवचनैर्योऽनारतं मृग्यते ।
यो वा संततचिन्तया विरहितैर्वाचंयमैर्ध्यायते ।
तस्मै सर्जनरक्षणात्ययकृतिप्रौढाय तुभ्यं नमः ॥ १३ ॥

इति प्रणिपत्य प्राञ्जलिबन्धेष्वमृतान्धःसु—

कटाक्षामृतपूरैरस्नापयन्नमरान् प्रति ।
दन्तकान्त्याभिवृद्धत्विट् चन्द्रचूडोऽगदीद्वचः ॥ १४ ॥
कच्चिद्वो भावुकं देवा कच्चिद्यज्ञः समेधते ।
कच्चिद्दिशति दम्भोलिर्जयसम्पत्परम्पराम् ॥ १५ ॥

इति कुशलपुरोगां तस्य वाणीं निशम्य श्रवणसरणिहृद्योदारपीयूषधारावर्षमनुपममुदं प्राप्तं देववृन्दं यथा......रादसमयघननादशद्वश्रावी मायूरमेति । ततः—

त्रिदिवे वासिनः सर्वे स्ववृत्तान्तमचीकृतन् ।
सुगतान् सुगतान् कृत्वा प्रमोदाच्छङ्करं प्रति ॥

भगवन्, भागवतानां भावुकसन्देहः कुतस्त्यः सर्वज्ञस्य देवदेवस्य चाविज्ञातं किं वाऽस्ति । तथापि, विततानन्दवशीभूतमन्दमतयो विज्ञापयामः ॥ स्वामिन्—

पूर्वं कंसवधादिका मधुमथः कृष्णावतारे कृतीः ।
दृष्टा भक्तिमभीयुरादितिसुतं निःश्रेयसार्थप्रदाम् ।
मायावी स पुनर्भ्रमं कलयितुं तेषां हि लीलानिधिः ।
बुद्धः सन् ह नास्तिकी......मतं दृष्टवा निनिन्दागमम् ॥ १६ ॥
दैत्यास्तत्प्रत्ययात्तं विविशुरथ मुदा दैवयोगादिदानीम् ।
व्यध्वं विध्वंसयन्तो निगमशतमतं मार्गमापाद्य युक्तिम् ।
राजन्ते कर्मनिष्ठानवनिसुरगणान् मोहयंस्तेऽपि वेदान् ।
क्लिश्यन्ते सप्ततन्तूनहह झटिति ते घ्नन्ति तृंहन्ति जन्तून् ॥ १७ ॥

किंच— अन्यन्मार्गन्तरं च प्रबलमति कलौ दुष्टपाषण्डजुष्टम् ।
कष्टं भूयिष्ठमेव प्रभवति सुतरां तुष्टविश्वम्भरायाः ।
इष्टं तन्नोऽष्टमूर्ते यदिह परिसलन्तीष्टिभिर्नष्टरिष्टा ।
इष्टापूर्तादिहृष्टा न किमपि परं सृष्टिकाष्ठाधिरूढा ॥ १८ ॥
इत्युक्त्वा स्वकिरीटनलदृषदां संघातघातोद्भव- ।
द्धूलीपालिभिराकलय्य रुचिरं तत्पादपङ्केरुहम् ।
इन्द्राणीशशिलाप्रभां क्षणममी इन्द्रादयो निर्जरा ।
व्यातिष्ठन् भगवान्नभौ पुनरिदं प्रोवाच कारुण्यभाक् ॥ १९ ॥

मनोभिलाषाशिल्पकृतिनिरोधिपर्वाणः सुपर्वाणो निर्वाणानादिवाणीविलासासक्त-प्रदीपान् बुद्धप्रणीतदुरध्वमाध्वीरसास्वादनचञ्चुचञ्चरीकान् पाषण्डकापालिकचार्वाक-सौगतांश्च जनान् पराजयभाजनानि कृत्वा पद्मपादहस्तामलकतोटकोदङ्कनामधेयै-विधेयैश्चतुर्भिरन्तेवासिभिः सहितः शङ्करनामा परिव्राट् भूत्वा श्रीमदद्वैतमतं श्रुत्यन्त-सारं व्यवस्थापयन् मनोरथं पूरयिष्यामि । तद्यूयमपि सर्वंसहायां सहायार्थमवतरत तावत् सकलशास्त्रमुर्ष्टिधयिषु जातिसंततिषु निश्चिन्ता इत्यादिश्य समक्षवर्तिनं सदृक्ष-विकर्तनं कार्तिकेयमाम्नायमूर्तिं स्कन्धं परावर्त्य दुग्धाकूपारमल्लकल्लोलमालापरम्परो-च्चलितशिशिरशीकरासारकुमारसुकुमारैरक्षीणैरपाङ्गवीक्षणैर्भविष्यन्मीमांसासार्वभौम-पदेऽभिषिञ्चन्निदमाचष्ट ॥

तात, तारकाराते कारागृहवासीकृतपरमेष्ठिन् कर्मयोगज्ञाननामकेषु काण्डत्रयेषु मध्यमकाण्डोद्धरणार्थमादिष्टौ हृषीकेशशेषौ संकर्षणपतञ्जालिनामधेयाववतीर्य विभ्राजेते इति जानात्येव भवान् ॥ अहं च ब्रह्ममीमांसाभाष्यं शङ्करनामभाक् ।
करोमीति प्रतिज्ञानं कृतवान् सत्यमेव तु ॥२० ॥

अतः— वत्स त्वं जगतीतले सुमनसां वंशे जनित्वा शुचं- ।
भाजां निर्जरसां मनोरथतरुं संवर्धयन्नञ्जसां ।
मीमांसावचनोदकैः श्रुतिपथं स्थास्नुं कुरुष्वात्र मा ।
मीमांसास्वेव कलाजितस्थिरतरा कीतिस्तरोज्जृम्भते ॥ २१ ॥
विरिञ्चिराम्नायपथानुसारिणः
शास्त्रस्य वक्ता भुवि मण्डनाभिधः ।
द्विजः सभार्यस्य कृते वृषापि ते ।
सुधन्वनामा नृपतिर्जनिष्यति ॥ २२ ॥
इत्थं महेशस्य वचो निशम्य ।
तेऽप्यग्रहीषुर्विबुधास्तथेति ।
तेषां मुदम्भोनिधिलङ्घनाय ।
प्रभुर्हनूमानपि नो तदानीम् ॥ २३ ॥



पश्यत्सु पाकारिमुखेषु तेषु ।
दृगुत्सवं द्रागहरत्पिनाकी ।
ततो निवृत्ता भगवन्नियोगं ।
प्रयेतिरेऽह्नाय विधातुमिष्टम् ॥ २४ ॥
ततः— अनेहसा केनचिदाविरासीत् ।
नाम्ना सुधन्वा सुरलोकराजः ।
यस्मिन् प्रशासत्यभवद्धरित्री ।
राजन्वती मङ्गलमन्दिराढ्या ॥ २५ ॥
विद्याचणोऽयं विबुधाधिपोऽपि ।
दोषं हि सर्वज्ञजनेषु पश्यन् ।
व्याजेन नित्यं श्रुतिदूषकोऽपि ।
श्रुति प्रमोदप्रदशब्दहृद्यः ॥ २६ ॥
महासेनोऽपि भूपालो महासेनागमेच्छया ।
सपद्याकारयांचक्रे सुधन्वा सौगताञ्ज्नान् ॥ २७ ॥
ततः— दैत्योन्मुक्तपृषत्कसंहतिहतिप्रादुर्भवद्भिर्व्रणै- ।
रुद्भूतोत्किणकोटिभिः स्थपुटितं रम्यं न देहं मम ।
इत्यालोच्य मुदा स तारकरिपुः श्रीभट्टपादाख्यया ।
भूमौ प्रादुरभूत्तथागततमोव्यूहप्रचण्डार्यमा ॥ २८ ॥
तदनन्तरं च—तन्त्रमधीयन्नपि भट्टोऽयं तान्त्रिकलोकं तरसा सर्वम् ।
जेतुमनस्को विजिताशाकोऽप्यादधदाशा विजयायेच्छाम् ॥ २९ ॥

अत्रान्तरे सुधन्वा प्रणिधिमुखविदितभट्टपाददिग्विजयवृत्तान्तः स्वान्तमानसं नितान्तमाश्वासयन् कथमपि दिवसान्यतिवाहयांचकार ॥

अथ कदाचित्सामन्तवसुमतीपालकसंकटविकटकिरीटकोटिघटितबिडौजोमणिदीप्ति पटलनीराजितपादपीठः पार्श्वभागवर्तिमत्तकाशिनीकरचालितचामरयुगलः गललम्बि-बहुलमृदुलहारलतिकादीधितिदीव्यद्विजयलक्ष्मीलक्षितवक्षःस्थलः सुदलपुटीकृतवीटिवितरण चतुरसर्किकरोषितनिकटप्रदेशः निजादेशश्रवणसावधानविनतपूर्वकायरजतयष्टिशिरोनि-हितकरतलललाटिकजनप्रक्रमितजयपराक्शब्दः (वैतालिकवृन्दोपश्लोकितश्लोकजालः) बृहदुपबर्हविनिहितवामभागः गाङ्गेयावलोकनलोलुभविलोचनकमलयमलोकदशबलाल पितकापथागमार्थविचारणादिपरस्परसंवादपाम्परीमुखरमुखनिखिलखलजलवावदूकचातु-रीविकृष्टमनोवृत्तिः क्षणक्षणं विश्राणनसलिलविवर्धितकीर्तिलताकुसुमायमानजैवातृकः प्रतापतापासहधावमानतपनस्यन्दनवनायुजत्वरितगमनविपरीतदिनघटिकागणनदूयमान-मुहूर्तज्ञानिकः रूपतुलितेक्षुधन्वाः सुधन्वा प्रभातसमयविद्योतमानखद्योतद्युतिमूर्तिमन्त्रमिमं रतिकान्तं वसुन्धरासंचारिणमिव धिषणं वेदपुरुषरूपिणं कमपि विप्रतनयमद्राक्षीत् ॥

तदनु सहसोत्थाय प्रणिपत्य प्राञ्जलिबन्ध......स(प?) र्यादिकं विधाय भद्रासन-मप्या (ध्या?) रोप्य 'भगवन्, भवदागमनाधिगतमङ्गलोऽहमिति व्याहारमधुरः सुधन्वा भट्टपादेनैवमभ्यधायि ॥

त्वत्कीर्त्या विजितो जगत्ययमपि भ्राम्यन् सुधांशूरविम् ।
शोकोत्क्षीणकलो विवेश शरणं सोऽपि प्रतापाग्निजम् ।
तापं सोढुमशक्त एव तनुते संचारमभ्रे ततः ।
मन्ये क्ष्माधिपते त्वयेति भुवने दर्शादिकर्मस्थितिः ॥ ३० ॥

राजानमित्थं स्वमतापदेशात्परिष्टुवन् बौद्धमतंगजाढ्याम् ।
समस्करोद्दिव्प्रवरो विपश्चित्कण्ठीरवस्तस्य तदा समज्याम् ॥ ३१ ॥

तदनु महीपतिसुरतरुविटपिविटपायमानमनीषिमुखशिखराशिखाखेलद्वाणीकोकिल-कूजितमाकर्ण्यासहमान इव नेदिष्ठमहीरुहशाखायां कोऽपि पिको व्याहरत् । श्रुत्वा तद्याजादिदमाह कौमारिलम्—

श्रुतिशोकाकरध्वानैर्मा कुलीनैः परीवृत ।
अमाधवस्य...भवेदाख्यातिस्ते वनप्रिय ॥ ३२ ॥
सुरसालतरूणां किमभिवृद्धिदिदृक्षया ।
ध्वांक्षस्यत्र वसन्तं त्वमहो मोहः कथं तव ॥ ३३ ॥

इति व्याहरन्तं दोषज्ञं शरजन्मानमेव विदित्वा संमोदमुपगते महाराजे सुधन्वनि सौगताः पादस्पृष्टा दीर्घपृष्ठा इवात्यन्तं चुकुपुः ।

भट्टं विदित्वा किल पर्वरं ततस्ते गर्वरत्वादिदमाबभाषिरे ।
निर्वाणदीपा निशि घर्घटीमिव मूर्खं त्रयीं पश्यसि लोकजिद्धताम् ॥ ३४ ॥
परस्परं भिन्नमताः खलोक्ता रुद्रेभिरित्यादिसुशब्दहीनाः ।
वेदाः प्रमाणं यदि मन्दबुद्धे कथं वद स्वात्मवपां जुहोति ॥ ३५ ॥
इत्यादिवाक्पाशविवादधीरान् सद्युक्तिभिः खण्डयति स्म भट्टः ।
ततो मतोच्छित्तिमुपेयिवांसस्ते तत्र संभ्रेमुरकम्पयोक्त्या ॥ ३६ ॥

ततः समस्तनिगमसंमतयुक्तिजालैरुन्मूलिते दशबलमतोऽभिमानी दृष्टमानुषवदनेषु शोकाविर्भूतनिःश्वासकवोष्णतापासहनतयेव शोणीभूतेषु सुधन्वा स्वमतदृढीकरणार्थ-मिदमाचचक्षे ॥

भगवन्, निखिलाम्नायपारावारोत्तरताराराविहारिसुन्दरीसखीभवच्छेमुषीकगर्वी-भवदुर्वीधरदर्वीकरमेधाहरणचतुरभट्टपाद भवादृशैर्विज्ञातमेव जयपराजयौ वादिप्रज्ञा-धीनाविति ॥

अहार्यशिखराद्यस्तु स्वमतं घोषयन् पतेत् ।
सत्यमेतन्मतं मन्ये नान्यथा कविकुञ्जराः ॥ ३७ ॥



इत्योदशं व्यदिशदवनीपालकोद्दिश्य नाशम् ।
गोष्ठीं कुर्वन् दशनकिरणैः काशनीकाशशोभाम् ।
तं च श्रुत्वा सुगतसुधियो मौनमभ्येत्य संस्था ।
भट्टः शीघ्रं शिखरिशिखरादागमालम्ब्यपप्तत् ॥ ३८ ॥

तं गोपायांचक्रुस्त्वा(रा?)पन्नरक्षा दक्षा वेदा मङ्क्षु भट्टं पतन्तम् ।
श्रुत्वा वृत्तं तस्य विप्राः प्रमोदादागुस्ते सुधर्मराजप्रजान्नो ॥ ३९ ॥
कर्माऽत्र साध्यं पतनं हि हेतुर्भट्टः स्वपक्षः सुगतो विपक्षः ।
पक्षं न जानामि कथं प्रमाणमभूदमीषां विदुषां विचित्रम् ॥ ४० ॥

ततः— प्राज्ञं भट्टपदं विलोक्य विमताहंकारसर्वंकषम् ।
बौद्धा स्वीयमते ऋशीयसि तदा क्षीणादराः प्राप्नुवन् ।
चित्तं किं न च ते पुनः क्षितिपति प्रोदुर्गतायुष्टया ।
कांस्कान् दैवगतिर्विमुञ्चतितरां पाषाणरेखा सखी ॥ ४१ ॥

अङ्ग महाराज, सपत्नपत्नीकबरीकलापसंतमसलोलदिवाकरायमाणचन्द्रहासहास-पराजितमल्लीकुसुमसुमनोजनपक्षपतिन् पातितयुक्तिजालवावदूकस्यास्याभ्रंलिहमहीध्रकूट पतनात् प्रतीकरक्षणं मणिमन्त्रादिभिरेव न मतसिद्धान्तात् ॥

यतः— सर्वज्ञो भगवान् बुद्धः स्वमतं स्थापयन् पुरा ।
त्रिलोकीं जयति स्मेदं वृत्तं सर्वे बुधा विदुः ॥ ४२ ॥
इति वदति तदानीं बौद्धलोकेऽतिकोपात् ।
शपथमतिकठोरं द्रागकार्षीन्नरेशः ॥
इति किल नरपाशा नो वदन्त्यत्र ये वा ।
मदुदितमिदमेते वध्यतामाप्नुवन्ति ॥ ४३ ॥

इति प्रतिशाप्य यन्त्रोपलकरणायायसकरग्रावतक्षादीनप्यादिश्य काकोदरोदरमानीत-मुदयशिलोच्चयविराजमान पद्मिनीवल्लभनीकाशं चामीकरकलशं निर्दिश्याऽस्मिन् किमस्तीति प्रच्छन्नं विश्वंभराधुरंधरं प्रति सर्वेऽपि श्वस्तनोऽस्य निर्णय इत्युक्त्वा यथायथं प्रांशुकेतनं स्वनिकेतनमढौकन्त ॥

ततो भूसुरा भासुरं सरसीरुहबन्धुमाम्नातमूर्तिं कन्धराद्वयसपाथसि तपस्यन्त-स्तदुदितावगतयथास्वज्ञाना नरपतिसमितिं समाजग्मु[a]ः॥ जैनास्तदा घटगतं भुजङ्गमं प्रोचु । नृपेण निहितं विधिः...पुनः । कार्तान्तिकानपि विधातुमिच्छकः कार्तान्तिकानहह भेदामातनोत् ॥ ततः—

निद्राति मद्रंकरपद्मनाभः सरीसृपे हाटककुम्भगेऽद्य ।
एवं द्विजेषु प्रवदत्सु राजा मत्वाऽनृतं तन्व्यसनं विवेश ॥ ४४ ॥

तदानीं च— भूप शुचं त्यज कल्पितमेतैस्तथ्यमवेहि कृतामिह सन्धाम् ।
कल्पककल्पनकल्पय फल्गुं कल्पमनल्पमुदेति यशस्ते ॥ ४५ ॥

इत्यशरीरिणीं वाणीमुपश्रुत्य विलोकमानस्यापभूतप्रत्यर्थिलोकमानस्य लोकपालस्य भुजङ्गेशाः शाङ्गीं नयनानयनगोचरो भवेत् । तनन्तरं नृपततिनेदमभ्यधायि ॥

खेलल्लेखशिलीमुखैरनुदिनं संपीयमानं शुभम् ।
यत्पादाम्बुजनिःनिसृतं विजयने गङ्गामरन्दं वरम् ।
भुव्यापुल्कसकल्कवज्जनशरण्यं तस्य लक्ष्मीपते ।
के वा ते विषयं वयं कलयितुं माहात्म्यमद्य स्तुतौ ॥ ४६ ॥

इति प्रस्तूय राजशेखरः[b] खरतरयन्त्रारोपणायाजिज्ञपत् ॥

आसेतु आहेमगिरीह दुष्टान् सर्वज्ञसंज्ञान् न तृणेढि यो वा ।
स मामकीरोऽपि भटोऽञ्जसां तां दशां नृपधृक् प्रतिपद्यते हि ॥ ४७ ॥

तदनन्तरम्——यन्त्रोपलारोपणतत्परैश्च याष्टीकपारश्वधिकादिभिश्च ।
समन्तभद्रा अपि भद्रहीनाः पञ्चत्वमापुरसंख्यकास्ते ॥
विनायकानुजोऽप्येष विनायकमतस्थितान् ।
उत्पाटयन् भट्टपादः प्रापूजि सकलैर्जनै : ॥ ४८ ॥
एवं दिग्विजयं कुर्बन् स्थापयन् वेदपद्धतिम् ।
स्वगृहे यज्ञकर्मादीन् भट्टपादः समस्कृत ॥ ४९ ॥

ततः—
वेदो नरीनर्ति मुखारविन्दे जनश्चरीकर्ति सुकर्म नित्यम् ।
जागर्ति सर्वत्र सवोऽमृतान्धः संज्ञास्तदा केवलमेव देवाः ॥५०॥
प्रभवानन्तरं क्रौञ्चभेदिनः शङ्करः स्वयम् ।
इयेषावतरीतुं द्राक् लोकसंरक्षणेच्छया ॥ ५१ ॥

अथ भगवान् त्रिपुरभेदी चूर्णातरङ्गिणीतुङ्गतरङ्गशीकरनिकरासङ्गशीतलमारुत-कम्पितानोकहव्यूहप्रदेशं तपस्विगणमिवं भृगुपरिशोभितं, ब्रह्माणमिव हिरण्यगर्भपदान्वितं, नारायणमिवारूढसुपर्णपादपं, महेश्वरमिव गृहीदुर्गं, सुब्रह्मण्यमिव वल्ली....निलयं, नृपतिमिव वाहसोल्लासप्रान्तं, वृत्तान्तकमिव गन्धर्वपरिवृतं, कुबेरमिव कुन्दादिनिधि-कटकं, चन्द्रमिव ऋक्षराजिराजितं, सूर्यमिव च्छायामोदकारिणं, धन्विनमिव वाहिनी-समीपवर्तिनं गायकमिव निषादादिपरिचर्याभूसंगानमिव ऋषभसहितं, क्षीराब्धिमिव हरिभासिततटं, पार्थमिव...शयावृतं, भूसुरवरिष्ठमिव महासत्रपरिष्कृतं, कैलासमिव नीलकण्ठोपशोभितं, सुवेलामिव सुपर्ववंशरमणीयं, तुषारगिरिमिव जनितशिवामुदितं, गगनतलमिव चित्रभानुशोभितं, तटाकमिव पुण्डरीकमण्डितं, व्याकरणमिव धातुप्रत्यय-विशदं, महाभारतमिवार्जुनादिसहितं, रामायणमिव मेघनादोद्वेजितशाखामृगं, भागवतमिव कृष्णसारोपस्कृतं, वेदमिव सवनप्रकाशकं, उक्षाणमिव वृषाभिधेयं, पर्वतवरमधिवसितुं स्वयंभूलिङ्गात्मनाऽऽविरासीत् ॥

शम्भुरपास्य वृषं सुरमित्रं केरलदेशमगात्सुचरितम् ।
तं वृषमत्र पुनश्च पवित्रं प्राप्त इति प्रथितं विचित्रम् ॥५२॥



तत्र च कश्चन विपश्चिन्निचयाञ्चितप्रपञ्चः न किञ्चनोर्णवकाञ्चीपतिः राजशेखरो नाम स्वप्नावगतवृषशिखरिवासिवृषकेतुं महावैभवो भवपीडापनोदनपटुतरं कैलासोदर-सोदरं प्रासादं परिकल्प्य पूजादिकमप्यचीकरत् । ततश्च वृषाद्रिवासिनः कृत्तिवाससो भगवतः प्रसादादासादितसम्पदधिकसुधीजनावतंससमन्वितः कालटिनामा महानग्रहारः समभूत् ॥

तस्मिन्विरेजे तपसा विरिञ्चो विद्याधिराजो हि यथार्थनामा ।
तस्याऽभवत्सूनुरुदारबुद्धिराचक्षते यं शिवगुर्वभिव्यम् ॥ ५३ ॥

अथ शिवगुरुनामा ब्रह्मचर्याश्रमेऽग्र्ये । निजगुरुवरिवस्यातत्परो वह्निसेवी ।
विनयगुणसमृद्धः स्वीयवेदादिसर्वं । शरवणभवदेशः सोऽध्यगीष्टातिहृष्टः ॥ ५४ ॥

अथार्थावधानपूर्वकेषु सकलवेदवेदाङ्गेष्वधीतेषु गुरुनियोगादूरीकृतगृहमेधीपथ मानसः शिवगुरुः गुरुदक्षिणां दापयित्वा जननगुरुणा विद्याधिराजेन मन्दमन्दमिन्दिरावास-भूमिममन्दानन्दाङ्कुरकन्दबन्धुसन्दोहमर्दितं सुधयेन्दुकुन्दधवलभित्तिसुन्दरमरविन्दबन्धु-सम्बन्धिमस्तकं मन्दिरं प्रत्यनायि ॥

ततः स्वसुतस्य पाणिपीडनकृते कन्यकाविचारणासक्तचित्तवृत्तिर्दातुमनसा समागतान् बहून् बन्धूनप्यसंमत्याऽपास्य विद्याधिराजो महाकुलीनममलीमसजन्मानमात्मनीनविद्या-विलासभूमिं मखपण्डितनामानं क्षोणीगीर्वाणं कन्यां प्रार्थयत ॥

विप्र त्वया सर्वगुणाढ्यगेहं मदीयमभ्येत्य सुता प्रदेया ।
इत्यूचिवांसं बहुधा निषेद्धुमशक्नुवन् सोऽपि तथेत्यगृह्णात् ॥ ५५ ॥

ततः–
शुभे मुहूर्ते गणकोत्तमोक्ते विद्याधिराजः स्वसुतस्य शीघ्रम् ।
वैवाहिकं कर्म निवृत्य बन्धूनतूतुषत्सूक्ष्मपटादिदानैः ॥ ५६ ॥

भार्यान्विते शिवगुरौ शिवकर्मशीले विश्राणनैकनिरतेऽथवनीपकानाम् ।
चिन्तामणिः सहपरो दृषतोऽधमस्य कल्पोऽपि किं बहुना[2] कविमुक्त आसीत् ॥ ५७ ॥

तदानीं च—
विश्वेषु यज्ञनिरतेषु च वेदवित्सु सर्वे सुरा अमृतामाशु जहुः कुदेवाः ।
तत्प्राग्ग्रहीषुरिह चित्रमिदं किमेतच्चित्रं पुनस्तु सकला अमृताशिनो यत् ।५८।

ततः–
कालेषु तं कतिपयेषु गतेषु विप्रं संतर्पयन्तमनिशं सुरभूसुरादीन् ।
गाङ्गेयधेनुकशकृत्करिसम्पदाढ्यं शोको ह्यनौरसभवः समपीडयन् द्राक् ।५९।
ततः स भार्यामवदत्सदैन्यो भद्रे प्रिये मा तनयोऽजनिष्ट ।
अस्माकमर्धं वयसो गतं तत् संबाधते नः प्रजया हि वाणी ॥६०॥
अतः प्रिये किं करवाव वंशः समाप्तिगामीति मनोऽतितप्तम् ।
शोचन्तमित्थं रमणं विलोक्य साध्वी बभाषे वृषवासिभक्ता ॥६१ ॥
भगवन् वृषगिरिनिवासी[3] भक्तजनाभीष्टदायिपदपद्मः ।
विभ्राजते पुराणः शरणं तं प्राप्नुवाव पुत्रार्थम् ॥६२ ॥

२. One syllable missing;

३. गिरिवासी. (?)

इति भाषमाणायाः प्रियाया वचनमभीष्टघटनपटुतरं निशम्य तथेति प्रतिगृह्णन् वृषशैलालय....(वैद्याधि....जि) कालकालं हृदयकमलनिलयं कलयित्वा पूर्णशैवल-नीरोधस्वतपस्यत् ॥

तस्य भार्याऽपि सततमुपवासादिभिः कृशा ।
भद्रादिनिलयं देवमर्हदिवमतो(ष) यन् ॥ ६३ ॥
जगाद जातु प्रणतार्तिहर्ता ।
निद्रालुमभ्येत्य स विप्ररूपी ।
किमीप्सितं ते वद तत्प्रदास्ये ।
ब्रह्मन् तपो मुञ्च कृशोऽपि पश्य ॥ ६४ ॥
इति विप्रवचः श्रुत्वा पुत्रकाम्यामहं गुरो ।
इति जल्पन्तमामोदादुवाच गिरिशः पुनः ॥ ६५ ॥
किं वावदूको गुणवार्धिरेकः ।
पुत्रोऽस्तु मूर्खा बहुहायनाः किम् ।
श्रुत्वा तदुक्ति शिवगुर्वभिख्यः ।
प्रार्थीथपत्प्राथमिकं प्रमोदात् ॥ ६६ ॥
शीघ्रं ततो जागरिता स विप्रः ।
स्वप्नं प्रियाय प्रशशंस तोषात् ।
तस्मिन् दिने ब्राह्मणभोजनादि– ।
वृषाचलागारमुदेऽकरोच्च ॥ ६७ ॥

अथ कतिपयदिवसेष्वतीतेषु

अस्वैरिणीनां धुरी या वधूटी – ।
मजीगणत्सा भगवत्पधत्त ।
गर्भन्ति ता भ्रूणवरो जरायौ ।
भर्गावतारो ववृधे शनैश्च ॥ ६८ ॥

शम्भौ तदानीमुदरंगतेऽस्याः किं मध्यमं चोत्तममाविरासीत् ।
स्यादन्यथेदं कथमाचकास...स्मृतं तत्समताऽस्य जाता ॥ ६९ ॥

मध्यस्थतापदमुपेत्य न युक्तमद्य गर्भस्य गोपनमिति प्रकटीकरोति ।
किं स्मावलग्नमथना शिवदर्शनेन संतोषत स्वयमहो ववृधे किमेतत् ॥ ७० ॥
तस्यास्तु देहं... । शिव ...काशि...तद्गुणमाचचार किम् ।
आहोस्विदेवं किमु दीधितिर्बही । ...रराजाधिकनिर्गता तदा ॥ ७१ ॥
मृत्स्नां तदानीं बुभुजे सती सा । मन्ये तदित्थं गिरिशांशयायम् ।
तेजःशरीरी भवतीति मत्वा । कर्तुं वपुः पार्थिवमिच्छतीति ॥ ७२ ॥
गौरवमादधते ये साध्या :सर्वे निराकृतास्ते तत् ।
युक्तं मन्ये कारणगुणवत्कार्ये गुणो हि विख्यातः ॥ ७३ ॥



तस्याः स्तनं मण्डनमुत्तमं च निराकरोतीति यदेतदस्य ।
डिम्भस्य कार्यं प्रकटीकरोति भावीति बुद्धिर्मम विद्यतेऽद्य ॥ ७४ ॥
वैजनने मयुकिंनरगानं देवकृताग्र्यनुतिं जयशब्दम् ।
स विशृणोति न पशति तांस्तु मोदमगात्किमिदं मम भाग्यम् ॥ ७५ ॥

ततः—— लग्ने साधु निरीक्षिते दिनकरे स्वं चैत्रमासं गते
पुत्रं सा सुषुवे वधूः शिवगुरोः प्राचीव बालारुणम् ।
केन्द्रस्थानवरं तदा प्रियकरं मन्दः कुजन्मा पुन-
-र्जीवोऽपि प्रगतो हरं गुरुमिमं न द्योतयत्यद्य किम् ॥ ७६ ॥

ओम् । अथ शिवगुरुः कुमारद्विजराजोदयमुपश्रुत्याऽभिवृद्धानन्दाम्भोनिधिलोल-कल्लोलमल्लकलितडोलोत्सवपरवशमानसमाकृष्य कथमपि चूर्णास्रोतस्विनि पाथसि स्नानादिकं विधाय ब्राह्मणेभ्यः स्वापतेयादिकमपि प्रदिश्य प्रविश्य निवेशनमलंचकार ॥

लोके तदानीं विमलं जलं नभः । प्रदक्षिणार्चिर्हुतभुक्प्रकाम्यते ।
नो जन्तवश्चापि परस्परं द्विषः । पुष्यन्ति सर्वत्र नगाश्च वल्लयः ॥ ७७ ॥
ये सन्ति चाद्वैतमतान्यवर्तिन । स्तेषां करात्प्रास्रसदग्यपुस्तकः ।
श्रीव्यासहृत्तामरसं विकस्वरं । जगत्प्रमादार्णवमग्नमैधत ॥ ७८ ॥
ततो महेशोऽर्भकरूपधारी । विवर्धमानो नयनाभिरामः ॥
महीतले यं स्वपदं निधातुं । तुदत्यशक्तो विपदं विचित्रम् ॥ ७९ ॥

ततः कदाचिच्छिशुकार्यकारी (or ततः क्रमेणार्भक°) ।
विस्माययन्नर्धवचोविलासैः ।
संचारमभ्यास्थत साधु साष्ठी ।
वद्ध्यां कराभ्यां शुभकङ्कणाभ्याम् ॥८० ॥

एवं पोतवपुर्धरः पुरहरो हारादिराराजितो ।
धीरान् धुरि मेदुरारवकरैः स्मेरारविन्दाननैः ।
डोलाधूलिविहारसादरभरैः स्फारैः कुमारैः समम् ।
माराकारकुची रराज नितरां वीथीष्वयं संचरन् ॥ ८१ ॥
अथासेचनको नृणां शं करोति दृशां यतः ।
तदाख्यया शिवगुरुः शङ्करं सुतमाह्वयत् ॥ ८२ ॥
यस्योत्तमाङ्गे विधुलक्ष्मि(क्ष्म?)नेत्र – ।
चिह्नं निटाले स्फटिकाभमङ्गम् ।
शूलोंऽसयो रेजुरमुं कुमारं ।
न मेनिरे किं सुधियः पुरारिम् ॥ ८३ ॥

महेश्वरे बालकगात्रमेत्य । विचित्रकर्मण्यव...लवित्रे ।
गोत्रे ज्ञता दारुणदारुणोऽथो । देवा अजायन्त मुरारिमुख्याः ॥ ८४ ॥

लोकोल्लसच्छोकमरालबाल– । लीलालयो यो विमलाभिधोऽस्य ।
अच्छद्मसद्मन्यपि पद्मनाभो । विद्माविरासीदिति पद्मपादः ॥ ८५ ॥°
वायुस्तादृशवाक् प्रभाकरस्य । सूनुस्तावकसूरिकोऽजनिष्ट ।
विश्वस्ताघगणो जगन्ति पातुं । यं हस्तामलकं वदन्ति सन्तः ॥ ८६ ॥
विद्यौघकूलंकषवावदूकता । फलेग्रहीन्द्रस्य महाग्रजन्मनः ।
तनूनपात्तोटकनामवानहो । महानटोऽभूदपि शङ्करार्चिकः ॥ ८७ ॥
(अटः तोकनामवान् अपत्यं तोकं तनयोः सम इत्यमरः ॥)
विद्याकपोत्या विलसद्विटङ्को । विवादिगर्वे पलतिग्मटङ्कः ।
शिलादसूनुः प्रहृतासदङ्कः । शिश्राय नाम्ना धरणीमुदङ्कः ॥ ८८ ॥

तदनन्तरं सनकसनन्दनादिवृन्दारकसन्दोहवन्दितपदारविन्दो भगवान् परमेष्ठी स्वयमपि सांसारिकसुखमनुभवितुमिवेन्दुशेखरमुखलेखचरणकुशेशयप्रकृतिलेखालाञ्छन-लक्षितरत्नगर्भां रत्नगर्भाममन्दानन्दतुन्दिला(मा?)नन्दगिरिनाम्ना भूषयांचकार ॥

अथ भास्करोऽपि प्रमातस्कस्य स्वतेजसा कांदिशीकस्य परदुरासदपामरमानस-निवासवासिनस्तमसः प्रोत्सादनाव्यक्त इव वसुमतीतले सनन्दनाभिधेय आविरासीत् ॥

ततः प्रसन्नचेताः प्रचेताश्चेतनाश्रयं विचेतुमिव चित्सुखनामा संभूतः सागरमेखला खलावसानखेदविहीनां लेखकण्ठीरवमण्डितां स्वयशोव्यूहैरश्लेषि ॥
संन्यस्य रम्भापरिरम्भसौख्यं । विन्यस्तचित्ताः शशिमौलिपादे ।
जन्यत्वमापद्य विचेरुरस्या । मन्ये मखाशाश्च तदा धरित्र्याम् ॥ ८९ ॥
वेधाः पुनर्मण्डनभूसुरोऽभूत् । विद्याशुकीमञ्जुलपञ्जरार्यः।
प्राज्ञाय मुख्या (or सन्तो धरण्या–) स्तिलकायमानं। कल्याणधर्माणमुदहरन्ति ॥९०॥

पुरा कदाचित्सकलबहिर्मुखतापसगणालङ्कृते तत्रत्यामर्त्यकीर्तितत्रय्यन्तसारव्याहा-रानुकरणपटुतरत्रोटीपुटशुकच्छटारटनविकटावरणशोभावहगोपुरवरवलभीपाली विहारपारावतहुंकारसंरावश्रवणवैपरीत्यशङ्किदुरहंकारकिंपुरुषादिश्रुतिपाठकवदनकोकनद-वैभवासहविपञ्चिकास्फालनालसपञ्चशाखशिखरिशिखरविलसन्नरवर हिमकरकिरणपूरितरुचिरपरिषदुपरि(री?)षीदुपनिषन्मयसित्रासनवरिष्ठविराजमान-भारतीमहोत्पलिनीवेणीकर्षणसाहसिकापाङ्गपतनजनितपतङ्गकेतुशङ्कानिलयपिता-महमहोव्यूहकवलितदिक्चक्रवाले व्यालपतिप्रभृतिसुकृतिकृतिकुञ्जरजलधरसरीसरदुरुशब्द झरीपरिवर्धितप्रमदफलपरीपाकाभिवृद्धिवृद्धमस्करिप्रकाण्डमस्करकाण्डषण्डोपलक्षितकरण्डो-पमजगदण्डभाण्डसृष्टिसामग्रीमण्डपभ्रान्त्यास्पदचत्वरप्रदेशे दशार्हदयानरीनृत्यच्छीतांशु-शतशीतलशोभनकटाक्षालोके सत्यलोके केशव इव सुदर्शनकरः, विरिञ्चिरिव सत्पुण्ड-रीकान्तरवासी, भास्कर इव तमोनिराकरणचतुरः, सुधांशुरिव भासुरात्र्यानन्ददायी, समुद्र इव पुष्करचराभिनुतः, मत्स्य इव सर्वतोमुखमानसः, संवत्सर इव प्रमातीतमहिमा,



मास इव तपःसहितः, पक्ष इव प्रतिपन्मुखः, दिवस इव सूर्याप्तगरिमा, वार इव सोमो-पेतोऽपि कुजन्मानाश्रितः, भवानीतचित्तोऽपि अभवानीतचित्त,ः क्षत्राधिपवन्दितोऽपि नक्षत्राधिपवन्दितः, परमहंसोऽपि सत्पथाचारी, अनेकशाखापरिष्कृतोऽपि जङ्गमरूपी भगवान् दुर्वासाः पावनां बृसीमलंचकार ॥ तदानीं च—

वाचंयमाः संसदि नैजविद्यामपाठिषुस्तत्र च सोऽत्रिपुत्रः ।
त्रयीमधीयन् स्वरतोऽस्खलत्तं निशम्य वाण्येषदहासि तोषात् ॥ ९१ ॥
देव्या गिरां स्मेरमुखारविन्दं दृष्ट्वा मुनीन्द्रः शशिसोदरत्वम् ।
पूर्वाद्रिमूर्ध्निस्फुरदर्ककान्तिवक्त्रोऽपि तत्र प्रकटीचकार ॥ ९२ ॥
प्रादुर्भव त्वं मनुजेषु जाल्मे श्रुत्वेति शापं त्रसति स्म वाणी ।
क्षमस्व मन्दाहमिति ब्रुवाणा तस्यान्यपप्तत् पदयोश्च शीघ्रम् ॥ ९३॥

तदानीं सनकसनन्दनादयो मुनयोऽपि भयानकनयनशोणसरोजकोणघूर्णितचञ्चरी-कायमाणतारकं विशङ्कटललाटपट्टघटितभयंकरकुटिलभ्रुकुटीकृष्णसरीसृपपटीरविटपि-कोटीकुटीरायितजटाकोटीरपटलप्रकटितधूर्जटिरूपं क्रोधोच्चलिताधरपुटतया मन्दाक्ष-मन्दितोच्चारणनिगमपठनमिव स्थितं दुर्वाससमतीव सान्त्वयामासुः ॥
कोपात्ततोऽयं विरमन्मुनीन्द्रः ।शापावसानार्थमवोचदेवम् ।
जनिष्यते शम्भुरिलातलेऽद्य । तद्दर्शनाद्वाणि निराधिरेधी ॥ ९४ ॥
दुर्वासस्यथ वेधसे निलयतो याते सरस्वत्यपि ।
(स्वीयाम्नायकतन्त्रधर्मनियमध्यानैकवीरान्वये। )
क्षोण्यां शोणतटे रसालकदलीलङ्गल्यशोकावृते ।
जाता संचरते स्म केलिभिरसावाल्यावलीमध्यगा ॥ ९५ ॥
दृग्वानामलकं फलं करतलन्यस्तं यथा लोकते ।
तद्वद्वाक् सकलाः कला विमलधीर्बाला विदामास सा ।
एतस्या सुषमानिकेतनतनोर्वैदुष्यवारांनिधे ।
प्राज्ञा अप्यवरं वरा न भुवने किं मेनिरे मण्डनम् ॥ ९६ ॥
सा किंवदन्त्या शरजन्मकल्पं कन्दर्पदर्पापहकान्त्यनल्पम् ।
तं विश्वरूपापरनामधेयं मनें निजं ह्यात्मनि भागधेयम् ॥ ९७ ॥

स मण्डनोऽपि बहुशः कर्णाकर्णिकया गुणम् ।
निशम्य तस्या भारत्याः कामाग्निपरिपीडितः ॥ ९८ ॥
अथ जातु शयालू तौ स्वप्नलब्धविलोकनौ ।
शरीरेण क्रशीयांसावभूतामितरेतरम् ॥ ९९ ॥

अथ विश्वरूपजनकः कार्श्यकारणं विविदिषुरात्मजमेवपृच्छत् । वत्स, धिक्कृत-कुसुमसासकाहोपुरुषिकायास्तव तनोस्तुलितमालतीसूनोः केन हेतुना म्लानोत्पत्तिः किं जडता प्रयुक्तेति ब्रूमः । तर्हि पातञ्जलादिसिद्धान्तचुञ्चवस्तव शिष्याः प्रतिबन्धकाः

यदि पराजयजनितेति व्याचक्ष्महे तर्ह्यसति धर्मिणि धर्मजननासंभवादिति घण्टाघोषोक्तिविरोधः । उताहो दारिद्रजातेति वदामः तर्हि गोरेकशफत्ववदसंभवः । आहोस्वित् आमयसंभूतेति भाषामहे तर्हि धन्वन्तरितन्त्रासंमतिः । किमुत पापाचरणोद्भूतेति विघ्नस्तर्हि कर्मशीलत्वे न विरुध्येत । यद्वा स्मरपीडासंभवेति जानीमस्तर्हि बालत्वेन प्रत्यक्षे बाधकः । तस्मात् किमिति विचिकित्सति मे हृदयं नानृतं वदेदिति नानृतात्पातकं परमिति च वचनात्तथ्यमेव कथय कर्तव्यं करिष्यते मयेति ।

पृच्छन्तमेवं प्रतिवक्तुमेष त्रेपेऽथ निर्बन्धत आबभाषे ।
तस्यां पुनः प्रेम न मोक्तुमीष्टे कं वा विमुञ्चेत्पुरुषं विमोहः ॥१००॥
शोणतीरजनतासरस्य या भारतीति तरलायतेऽबला ।
तामशेषगुणवारिधिं गुरो ईप्सु मेऽद्य तरलायते मनः ॥१०१॥

इति वदतः पुत्रस्य मनोवृत्तिं निशम्य शुभनाडिकायां हेहयदेशात्प्रस्थितो हयाधिरूढः सपरिचारको गच्छन्नुपरि को वा ग्रामः, कीदृशो मार्ग इति संपृच्छमानः विश्वरूपगुरुरनेकारण्यानीमतीत्य कल्लोलमल्लोल्लासशीतलेन वल्लीतल्लजसंजातसंफुल्लमल्लिकादिप्रसूनवाससुगन्धिना गन्धवहेन कारितातिथेये शोणसरित्तटोपवने क्षणं विश्रमसुखमनुबभूव ॥

ततः पवनोद्भूतविस्तारविस्तारवनस्पतिकतया प्रसरवरलाभवानयमिति कृतशिरःकम्पवदुपलक्षितं प्रचलितकिसलयाङ्गुलिकतया कृताहुतिमिव स्थितमग्रहारं प्रविश्य तादृशसुताजननसूचितभाग्यातिरेकं भारतीजनकं कन्यकामयाचत ॥

सोऽथ मण्डनतातस्य वाचं श्रुत्वा मुदाऽस्मरत् ।
मण्डनस्य गुणान् श्रुत्वा कुशास्मीति सुतावचः ॥१०२॥

ततः संतोषपरम्परैकतानो भारतीपिताऽप्येवमभाषत ॥

भगवन्नद्य सफलं जन्म दिष्ट्या विवत्स्यति ।
दुहिता भविता ज्ञाता जामाता मण्डनो यतः ॥ १०३ ॥
विद्वन् पाणिगृहीं त्वं सपुत्रां बन्धुभिः सह ।
अस्मदीयमिमं ग्रामं शुभमागमय द्रुतम् ॥ १०४ ॥
त्रयोदशाहाद्दिवसे परस्मिन् सुता दशम्यां मम मण्डनाय ।
देयेति पत्नी बहुहर्षयुक्ता संतिष्ठतेऽह्नाय यतस्व विद्वन् ॥ १०५ ॥

इति वचो निशम्य पूर्णमनोरथो मण्डनजनकः सदारकान् दारान् बान्धवानप्यानैषीत् । ततः—

तौ सूक्ष्मक्ष्मौमलसितौ भारतीमण्डनौ सभाम् ।
किञ्चिन्मन्दाक्षमन्दाक्षौ भूषयामासतुस्तदा ॥ १०६ ॥
शुभे मुहूर्ते पणवादितालैरङ्क्यारवैर्विप्रजनोक्तमन्त्रैः ।
सीमन्तिनीगानरवैश्च हृघे (द्यैः?) वैवाहिकं मङ्गलमाररम्भत् ॥ १०७ ॥



(अङ्क्यारवैः चिकुमेलम् । ) ततः—

कन्या हंसकमूर्मिकां च कटकं प्रालम्बिकं गोस्तनं ।
गुच्छं माणवसं च गर्भकुसुमं सा पारतथ्यामपि । (पारतथ्यं चोरुकु)
केयूरं चलकिङ्किणीकरशनां ग्रैवेयकं कुण्डलं ।
मञ्जीरादिकमण्डयच्च विलसन्ती मण्डनस्यान्तिके ॥ १०८ ॥

तदाः— मण्डने मण्डनं प्राज्ञाः संयोगेनाविदन् तदा ।
तन्मन्ये साम्प्रतं यस्मात्तादात्म्येन घटे घटः ॥ १०९ ॥
मन्त्रजालान्धिते पत्र वह्निभूसुरसाक्षिकम् ।
विश्वरूपो मुदा शुद्धां भारतीं तामुपायत ॥
अपूपुजदतूतुषत्सकलबन्धुवर्ग्यांस्तत– ।
स्तुरीयदिवसान्तिमे बुधवरः स तस्याः पिता ।
दूकूलवलयादिभिः कलयति स्म पुत्र्याः पुन–।
र्मतिं च गुणशालिनि श्वशुरयोर्मतं कुर्विति ॥ ११०॥
ततश्च प्रस्थितास्तस्मात्संमत्या मण्डनादयः ।
आमोदोदधिवेलाया खेलन्तोऽशिश्रियन् गृहम् ॥ १११ ॥

बालयौवनदशाक्रियया मनोज्ञौ । लज्जाधुरीणमनसा चलरागभाजौ ।
श्रीपार्वतीपशुपती इव दम्पती तौ । गेहे रराजतुरमू शुभकर्मशीलौ ॥ ११२ ॥

एवं देववरा धरातलगता रेजुः स्मरार्याज्ञया ।
पत्नीभिः सममेव तत्र भगवान् पश्चाद्विपश्चिन्मुदे ।
सञ्जातश्चरणारविन्दसुभगं तं केरलं शङ्करः ।
कुर्वन्नन्यमतस्थवादिभयदो बालैः समक्रीडत ॥ ११३ ॥ ओम् ।
मत्या सान्द्ररसार्द्रमत्र कृतिविद्भ्राणं भणन्ति स्फुटं ।
स्वर्णाढयं किल वर्णयन्ति कतिचित्कर्णामृतं निर्णयम् ।
वागुच्चावचमीरिताऽपि महिता वर्तेत कीर्त्या भृशं ।
श्रीमच्छङ्करदेशिकेन्द्रकरुणावीक्षारसार्द्रीकृता ॥ ११४ ॥

प्राज्ञैरप्यकुतोभयो नियमितप्राणैर्न लभ्योऽत्र यः ।
प्राप्यैनं तितरीषुणा रघुपतेः कारुण्यरूपं प्लवम् ।
आरब्धे परमेश्वरेण सुधिया ग्रन्थे पयोवारिधा ।
–वाद्योऽयं विमलो मनोहरतरैः शब्दैस्तरङ्गोऽभवत् ॥ ११५ ॥

॥ इति श्रीकविकण्ठीरवेण परमेश्वरेण विरचिते आचार्यविजयाख्याने चम्पुकाव्ये प्रथमस्तरङ्गः ॥

---

**॥ द्वितीयस्तरङ्गः ॥**

अर्वाग्जनं च शरणागतमाजुगोप ।
दुर्वादिपेचकनिकृष्टकुलस्य यो वा ।
गर्वावृतस्य खरभानुरभूत्तमोघ्नं ।
शर्वाकृति शिवगुरोस्तनुजं नमामि ॥ १ ॥

अथ वैद्याधिराजप्यनस्तुरीयादर्वाचीने वयसि वर्तमानोऽपि स्वतेजसा मार्तण्डमूर्ति-कीर्तिहर्ता रुचिरसारसनावलम्बिकिङ्किणीनिक्वणसूचितागमनावलोकनासक्तिसमु-पसीदन्मत्तकाशिनीजनविलोचनमेचकाम्भोजवीक्षणजनिततोरणावल्यां प्रतोल्यां संचरत् महात्मनि कस्मिंश्चिद्विप्रवरेऽनायासेनैव सकला ली................

......चोऽधिजगेतराम् ॥

शिवगुरुतनुजोऽयं शङ्करो विप्रवर्या– ।
न्निखिलविबुधवन्द्यात्सर्वविद्यां तथाऽगात् ।
मिहिरकरकदम्बस्पर्शनात्पद्मकोशो ।
विकचमिह यथाच्छः काल्य आशु प्रवाति ॥ २ ॥
अखिलगुणसमूहैः शङ्करं संगृणन्ति ।
प्रमथपतिसदृक्षं दक्षिणाः किं विचित्रम् ।
उदयमुपगतश्चेत्किं निजं भेदवत्स्या– ।
द्यदि भवति दिनेशो ह्यस्तनाद्दर्शयन्तम् ॥ ३ ॥
काव्ये काणभुजे फणीन्द्रवचने भाट्टे च वैय्यासिके ।
न्याये ज्यौतिषके कलासु सकलास्वन्यासु चायं पटु : ।
तत्तद्ग्रन्थकृतं तृणाय वचसा मेने व्रती शङ्करः ।
साक्षाच्छङ्कर एव वेदनिचये वर्ण्यः स किं मादृशैः ॥ ४ ॥

अथ जातु भगवान् शङ्करः सालेषु कल्पक इव, लेखकुलेषु वलारातिरिव, नक्षत्रेषु क्षपापतिरिव, हारेषु नायकमणिरिव, ग्रहेषु मिहिर इव, व्रतशालीषु अधिपतिराजहंस इव, कले मालानां मध्ये सतीर्थ्यानां विराजमानः कान्तितुलितादित्यो निवृत्ताह्निककृत्योः मध्याह्नसमये भैक्षमुपतिष्ठमानो दारिद्र्यवारिनिधेस्तपसा दुर्वासस्त्रयीविद्यया वेधसा, ध्यानेन भक्त्या च शिलादकुमारस्य कस्यचिद्भूसुरस्य निवासं सहसा प्रविश्य भिक्षामयाचत ॥ ततः—

साध्वी माध्वीरसचयझरी दर्पपारं परीणां ।
हन्त्रीं गन्त्रीममरतटिनीपाथसामग्रभागे ।
वाणीमेणीनयनरमणीयेक्षणा तत्क्षणेन ।
श्रुत्वा गत्वा निकटमुटजात्प्रश्रितां वाचमूचे ॥ ५ ॥



व्र(प्र?) त्यग्रेसरजन्मिने वितरणं क्षेमाय सम्पद्यते ।
विप्राय प्रतिपादनं त्वधिकमस्माज्ज्ञानिने ते पुनः ।
साक्षादीश्वररूपिणे जनगिरां दूरेऽन्नदानं न किं ।
दारिद्र्यानलदग्धभाग्यभवना किन्तु प्रमुह्याम्यहम् ॥ ६ ॥

इति खिन्नहृदया धिगिदमनुपकारि जन्मेति बाष्पोपरुद्धकण्ठं व्याहरन्ती सती व्रतीन्दुकरकमले फलमामलकं निधाय नेदीयस्यां स्थल्यामुपतिष्ठत ॥ ततः—

वाचं शोकनिदानगात्तटमुखीं तस्या निशम्याऽदरात् ।
आचन्द्रार्कयशा व्रती सकरुणा वारांनिधिः शङ्करः ।
मोचावर्यरसायनप्रतिभटैः पद्यै...तां पि अस– ।
–ङ्कोचां सम्पदमुञ्चिकीर्षुरुटजे तुष्टाव नष्टैनसि ॥ ७ ॥
तदनन्तरम्— कनत्कनककिङ्किणीक्वणनमस्तुकस्राङ्घ्रिका ।
वियत्तलतटत्तटित्सदृशदेहवल्ली रमा ।
नवस्फुटितगोत्रभिद्वृषदुदारकान्तिस्फुरत् ।
कटाक्षसलिलेक्षणं व्रतिपतिं समाप्लावयत् ॥ ८ ॥
ततस्तु ललिता स्तुत्या प्रसन्नाऽऽचष्ट शङ्करम् ।
कस्य हेतोः स्तवीषि त्वं वद वत्सेति सादरम् ॥ ९ ॥
अधरीकृतपीयूषां वाचं श्रुत्वा स शङ्करः ।
अभ्युप्येत्य दृढा भक्तिः साञ्जलिः प्रत्युवाच ताम् ॥ १० ॥
यत्कटाक्षलवतो मघवाद्याः प्राप्तसम्पदधिकाः समभूवन् ।
त्रायते हरति सृज्यतेपि या त्वं हि वेत्सि न किमम्ब तादृशी ॥ ११ ॥
अम्बविधुबिम्बमुखि कम्बुनिभकण्ठे ।
कुम्भभवगर्वनुतसर्वसुचरित्रे ।
साश्मतलवेश्मसहकश्मलममुष्या ।
हस्तिगतमस्तसमवस्तुनिबरीसम् ॥ १२ ॥

इति महीसुरवरस्य दुर्गतिमार्गसमपनिनीषया निसर्गदयोर्मिमाली (लि) नि भर्गाकृतौ व्रतिकुञ्जरे विज्ञापितकर्तव्ये भार्गवी वत्स पुराजन्यामनेन सुकृतं न कृतं किन्तु तवापाङ्गवीक्षणगोचरतया जन्मेदं भूयस्यै श्रेयस्यै सम्पद्यत इति व्याहृत्य करकामलकजालकैरधिकैरगारं पूरयित्वाऽन्तरिता बभूव ॥

तदनन्तरं सन्ततसन्तोषसन्ततिपरवशप्रकृतिरचितनुतिकोलाहलमुखरितहरिदन्तरदन्तावलफीत्कृतिबोधितविबुधकरनिकरावकिरितपारिजातादिकुसुमसमूहैरर्च्यमानः सहचरैः परीवृतः सदाचारविर(च)नचतुरो जगदभयंकरः शङ्करः स्वगुरुशरणं शनैराढौक्य यथापूर्वां तन्त्राण्यशिषत्[1] ।

१. °शिक्षत् ? ।

प्रत्तस्य कृतिवस्त्रस्य नूत्नावतरदेशिकम् ।
सम्प्राप्य विद्या तुष्टाऽभूम्मित्रमाप्तेव पद्मिनी ॥ १३ ॥
यस्य क्षान्तिविचारणे किल भुवो नाम्ना क्षमां मन्वते ।
शाखाद्यर्थविचारणे शरभुवो युक्तां विशाखाभिधाम् ।
वैराग्यस्य विचारणे शुकमुखे लोकेन तां तत्कथाम् ।
रूपेऽनङ्गमनङ्गमेव च कृतौ हास्याय जायेऽस्य हा ॥ १४ ॥
आहुस्तं नखलेखया हिमरुचो लेखासदृक्षां भ्रमात् ।
गोत्रेऽथ्ये जनितस्य सा क्व नु चतुःषष्टेः कलानां निधेः ।
श्रीशम्भो...कलङ्किनो जनिमतो सावन्त्यगोत्रे कला–। (पाश्चात्य)
सीनाः षोडश बिभ्रतः क्व नु कलङ्कोपेतमूर्तेर्विधोः ॥ १५ ॥
यस्मादद्य सदालिमोदिभुवने ख्यातं च हंसैर्वृतम् ।
सूर्यामोदधरं शुभं परमधूलीसुन्दरं लक्ष्यते ।
तस्मात्पङ्कजसंनिभं प्रतिपदं प्राहुर्बुधास्तद्भ्रमम् ।
नन्व्येऽहं यदपङ्कजातसदृशं नक्तं दिवं दीव्यति ॥ १६ ॥
हृद्यैरावणपुष्करेण तुलनां सक्त्नः फणन्ते बुधा : ।
नाभिं मेरुदरी सनाभिमहिमा सर्वस्वदस्युञ्चये ।
अस्य स्फाटिकयष्टिमध्यलसितां सौवर्णरेखात्रयीं ।
निन्दन्तीति वलित्रयीमिह कथंकारं न जल्पन्ति ते ॥ १७ ॥
अररं तुलयन्ति वक्षसाऽस्य स्मररागहरस्य विष्टपेषु ।
नररञ्जनवागियं वृथा स्याद्वररूपमिदं क्व तारवं क्व ॥ १८ ॥
यदि कोकनदे रुचिरे वितिष्ठते पञ्चपल्लवी रक्ता ।
विधुरेखा तच्छिरसि स्याच्चेत्तत्तु(ल्य)...मस्य पाणियुगम् ॥ १९ ॥
भगवत्पदबाहुयुगं दृष्ट्वा सर्वश्च शेषभोगनिभम् ।
मुञ्चति हृदयग्रन्थिं सत्यं दण्डस्तु भा...रत्येनम् ॥ २० ॥
...समीक्ष्य रुचिरं महितस्य पूर्वम् ।
शङ्खो जले न्यपतदेव विलज्जमानः ।
अद्य प्रकाशमधमा भुवि कुर्वते हे– ।
त्याक्रोशति ध्रुवमतो निनदापदेशात् ॥ २१ ॥
निर्दुष्टं वदनं विलोक्य महतो दोषाकरो लज्जया ।
रात्रौ संचरते विलोचनयुगं चेन्दीवरं सुन्दरम् ।
नक्षत्राणि च दन्तपङ्क्तिगरिमां जानाति तेषामतः ।
सौहार्दं समधर्मणां समभवद्भिन्नस्थितीनामपि ॥ २२ ॥
अधरीकृतवान् वेधाः किसलयवर्यं शिवाकृतौ तस्मिन् ।
कथयति सम्प्रति बिम्बं हृद्यो रदनच्छदस्तद्वत् ॥ २३ ॥



वदत्यमुष्मिन् द्युसरित्प्रवाहधाटीप्रतीकाशवचोविलासे ।
नयोजनः संशृणुते मधूलीं सश्लाघतेतां सुधया सहैव ॥ २४ ॥
क्षीरं क्षारसदृक्षं द्राक्षां रुद्राक्षसोदरीं चेक्षुम् ।
माक्षिकमुख्यमभक्ष्यं भणन्ति तस्योक्तिमेव शृण्वन्तः ॥ २५ ॥
रम्भासंफलमाधुरीझरिपरीरम्भप्रियं भावुका ।
फुल्लाक्षुल्लकमल्लिकापरिमलश्रीगर्वसर्वंकषा ।
विद्वत्केसरिचातुरीपरिसरत्सौभाग्यनाडिंधमा ।
वाग्भङ्गी जनरञ्जिनी किल वरीवर्धिक्षितौ शाङ्करी ॥ २६ ॥

तदनु सुकुमाररूपविजितरमाकुमारस्य विद्यातुलितकुमारस्य भगवतः शङ्करस्य तत्तदाशययशःशशिना धवलिमावलिमाधुर्यधुर्यमभवज्जगन्मण्डलम् ॥ तथा हि—

लोकालोकगिरीन्द्रपश्चिमतटीचन्द्राश्मनिर्यत्पयः ।
पूरैः कैरविणीविनन्दतितरामद्यापि पाद्मासनम् ।
अम्भोजं लजते विकासविरहात्पातालमालोकते ।
ज्योत्स्नावैभवमिन्दुशेखरयशो राजेवलत्यद्भुतम् ॥ २७ ॥

किंबहुना—न वर्णनीयो भगवान् व्रतिकुलचक्रवर्ती शङ्करः सहस्रवदनेनापि ।यतः—

चिद्वास्तव्यार्यनिर्यातिवचनपरमार्थस्य निष्ठानपेटी ।
यद्वाक् पद्यामविद्यारचितघटपटाद्यर्थभेदां भिनत्ति ।
हृद्यां चाद्वैतविद्यां ज्ञपयति भुवनेऽनेकपुण्यैकलभ्याम् ।
सद्यः षाण्मातुराद्या दधति भगवतस्तस्य मौनं पुरस्तात् ॥ २८ ॥

ततः कदाचिदष्टमादर्वाचीनहायनकृतपूजानो जानपदविनिन्दितो गुरुकुलादावर्त्य स्वनिकायमधिवास्तव्यो विहितकारी युधिष्ठिर इव कृष्णवर्त्मनिषेवणासक्तमनाः कृष्ण इव धृतार्जुनवसनः, अर्जुन इव सुभद्राविष्कृतमार्गानुसारी, शम्भुरिव सर्वमङ्गलाढ्यः, इन्द्र इव सुमनस्तुतः, सेनानीरिवाम्बिकापरिचर्यानिरतः, व्यास इव पुराणवेत्ता, प्रसङ्गोत्सुकोऽपि विप्रसङ्गोत्सुकः, भूषणसहितपदसुभगवाक्याभिमुखनिखिलकविपञ्चनखमुखाम्बुजाम्बरमणिः, शङ्करो नखपञ्चपदव्यां दवीयस्यां ललाटेतपतप नदीधितितप्तां मातरमुपश्रुत्य संनिकृष्टमुपहृतं स्रवन्तीपरिसरवासिनीं सरसीरुहपत्रच्छायेन सलिलदानेन च गतमोहां कृत्वा शनैः शनैर्निकेतनमनीनयत् ॥

अधिष्ठितो ब्रह्मचर्यं स ततः शास्त्रसंचयात् ।
वाचस्पतिरिव श्रीमान् विबुधादध्यजीगपत् ॥ २९ ॥
उत्तुङ्गभङ्गोल्ललदभ्रगङ्गाभङ्गप्रदस्तन्मुखतः पदौघः ।
उज्जृम्भत व्यासमुनीशमान्यः श्लोको दिगन्ते समभूद्विचित्रम् ॥ ३० ॥

अथ कदाचिच्चतुस्तन्त्रमुर्ष्ठिधयसुधीजनोपश्लोकितजगन्मङ्गलशङ्करगुणगण-श्रवणैकोत्सुकश्रवणशष्कुलिना केरलभूपतिना दिदृक्षया समानेतुं प्रेषितः सचिवपुङ्गवः समागत्य देदीप्यमानवपुषं प्रणम्य मुकुलितकरपद्मो विनयविनम्रपूर्वकायो व्यजिज्ञपत् ।

शङ्करो भगवान् साक्षाद्यच्छरीरेण राजते ।
पश्यन्ति तं भवन्तं ये तेऽनन्तसुकृतान्विताः ॥ ३१ ॥

इदानीं किल भगवन् दक्षिणविचक्षणरक्षणादक्षलक्ष्मीसंधुक्षणसुशक्तकटाक्षवीक्षणो नीतिवल्लरीतल्लजबलाहकसुकृतकल्पद्रुमसर्जनक्षीरपयोनिधिः कुलकेतुः केरलदेशाधिपति-स्तदीयचरणराजीवश्रितजीवः समालुलोकिषुर्मां प्रेषितवानिति ॥

अथ वैद्याधिराजायानः शङ्करस्तस्य वचनं निशम्य सस्मितमिदमभाणीत् । अङ्ग सचिवपुङ्गव—

पाटच्चरीभूतपटेच्छुकानां । मोक्षाप्तिकाङ्क्षा गुरुशिक्षितानाम् ।
कुक्षिंभरीणामिह भिक्षुकाणां । किं क्षीणमाप्नोति मतिः कुभोगम् ॥ ३२ ॥
श्रीकण्ठमव्याजदयापयोधि– । मज्ञानलुण्टाकपदं विसृज्य ।
भूपालमाकाङ्क्षति यो नृपाशः । क्षीरं स मुक्त्वा न जलं पिबेत्किम् ॥३३ ॥
संजवनीं जीवनदानदक्षिणा– । मामुच्य हालाहलमन्तदायिनम् ।
जिजीविषुर्विन्दति किं विचक्षण–। स्त्वमेव धीराग्रसरो गृणीहि तत् ॥ ३४ ॥

तेन सुमेधसामभीक्ष्णं न वचनीयं किल इतो गच्छतु भवान् प्रत्युत्तरं व्याहरता-मिति गिरं गिरन्तं नमस्कृत्याऽमात्यवरिष्ठो दिष्टचा दृष्टो भगवानित्याभिष्टूयमान-स्तरसा केरलविश्वंभरा भराधौरेयराजशेखरपरिषत्परीसरमुपसरन् शङ्कनीयमहिमा स्मरणसरीसरदानन्दबाष्पोदभारनदीमातृकीकृतसमुदञ्चितरोमाञ्चप्रपञ्चबीजाङ्कुरपूर-पूरितशरीरः शाङ्करीं कथामचिकीर्तत् ॥

ततः स्वयं केरलभृत्कुतूहलात् । प्रतस्थिवान् द्राङ्नमुचेर्द्विषन्निव ।
वन्दारुभूभृत्सुमनः परीवृतः । श्रीशङ्कराङ्घ्रिद्वयमालुलोकिषुः ॥ ३५ ॥

अथाऽगत्याङ्घ्रिकमलेऽमले मानसवासिवत् ।
संपतन्विनय।नम्रे कम्रो भूभृदुवाच तम् ॥ ३६ ॥
एकापदं च न लभे यमुनेति पापः ।
सत्यं त्वदी(य)पदपुष्करदर्शनेन ।
अष्टापदं रचितवानहमङ्घ्रिमूले ।
सोढव्य (ए)व भवता दययाऽपराधम्[2] ॥ ३७ ॥
द्विजराजोऽपि भास्वांस्त्वं यतः करसरोरुहम् ।
द्रष्टुः संकोचमायाति व्याकोचं...हृदाम्बुजम् ॥ ३८ ॥

२. अपराधः ।



वाणीं फणीशं धिषणं गणेश– । मान्दोलयन्तीमवधीरयन्तीम् ।
प्रेङ्खोलयन्तीं च विडम्बयन्तीं । वाचं दधासि ध्रुवमीश्वरस्त्वम् ॥ ३९ ॥
तेन त्वां प्रार्थये स्वमिन् मत्समे...सुतोऽस्त्विति ।
विलोकतामिमां किं च विना नाटकत्रयीम् ॥ ४० ॥

इति केरलाधिपतिना प्रार्थितो भगवत्पादो विस्मयरहितोऽपि विस्मयाविष्टः सृष्टेव[2a] दृष्टसर्वतन्त्रः, अष्टमूर्तिरिव विनष्टारिष्टः, विष्टपोत्सृष्टकीर्तिः प्रकटितनाटक-त्रयाभिप्रायं स्फुटमुद्घाटचाभीष्टं धित्सुतया विस्पष्टं व्याचष्ट ॥

तथा भवति ते भूप सत्यं त्रिदिववासिनाम् ।
सेवातो नाटकं चेदं नटलोकादिसंमतम् ॥ ४१ ॥
अथ वदति मुनीशे संप्रयच्छन्द्विजेभ्यो ।
धरणिरमणिनित्यं कर्मवत्मश्रियेस्त्वम् ।
भगवति परमा ते भक्तिरस्त्वित्यनुज्ञा – ।
मपतदवनिपालः कृत्तशाखीव पादे ॥ ४२ ॥

ततः संमोदेन क्षितिपतिरयं शङ्करमुनिं स्तुवन् नत्वा नत्वा जनपदमगात् स्वीयमतुलम्
प्रसूः साध्वी मेने रचिततपसोद्भूतमथ तं सुमास्त्रारातिं दुर्वसनमनसूयेव तनयम् ॥ ४२अ ॥

परिणतमथ वैराग्याश्रितस्यास्य कृत्वा ।
प्रमदमधिकमाप्तुं मेनिरे बन्धुवर्ग्याः ।
गगनकुसुमगन्धोद्वासितं केशपाशं ।
कलयितुमलमेते संततं संयतन्ते ॥ ४३ ॥

तदानीं च निजभक्तजनचित्तपदसक्तबलवत्तरविमत्तदुरीतदूरीकरणपटुतरचरण-जलरुहयुगलस्य भगवतः पुरमथकृतो नूतनावतरणगुरुशङ्करविरचितचरितावलोकन-लोलुपाशया स्फटिकजपसरपरिचितधवलितमाप्रसरपाटलितकमलतुलाशया निटि लाञ्चितरक्षातिकलतया कामुकाहंकृतिघस्मरस्मरवर्ष्मभस्मधूलीधूसरितललाटनयनं स्मरहरमनुकुर्वन्तो देशान्तरगमनचतुरस्वेच्छावन्तो जटावलयकिरीटपद्मलरागायित-शिखाजालैरुल्लसज्ज्वालज्ज्वलनतुलनाः श्रुतिशिरसिकृतखेलनाः पूतोपवीतरुचिरवक्षसो धूतोपजापकररक्षसः कटिलम्बिघनवल्काः भसितोद्धूलनहृतकल्काः सदा तपश्चरणात्तत-निमाङ्गाः सदालिलोभनीयापाङ्गाः लोकानर्हंसरणिविमुखाः लोपामुद्रारमणमुखाः गृहीत-नियमा वाचंयमा शिवगुरुभवनं समाजग्मुः ॥

उपमन्युदधीचिगौतमात्रितुलागस्त्यमुखान् समागतान् ।
अवलोक्य मुनीन् ननाम तान् प्रसुवासाकमसौ तदा व्रती ॥ ४४ ॥

२a. स्रष्टेव? ।

ततः—  नितान्तं तान्तानां भवदवशिखाभिः सुशरणं ।
नमन्तं मन्तारो नयनकमलं मीलितममी ।
अकुर्वन्नर्वाञ्चो वयमिति पुरः शङ्करमहो ।
अपश्यं पश्यामः किमिदमिति विस्मेरवदनाः ॥ ४५ ॥
तपस्विनां शङ्करदेशिकेशिता ततः सपर्यामकरोद्यथाविधि ।
ब्रसीमलंचक्रुरमी च तापसाः कथादिकं तेन सहाप्यचकीकरन[2b] ॥ ४६ ॥

अथ कथान्तरे निजतनुजसहजधर्मबुभुत्सया भगवतो जनयित्री पवित्रीकृतधरित्रीतलानभ्रंलिहविन्ध्यशिलोच्चयाभिमानघनैकाकारिककुम्भजन्मदुःखान्निराकाङ्क्षान् पारिकाक्षिजनान् प्रत्येवमवादीत् ॥

स्वामिन् भो भो महर्षयः कलिकालदुर्लभं भगवतां भवतां विमलपदकमलविलोकनम् । इदानीं लोभनीयमपि सुलभमेव संवृत्तम् । अतो मम श्रेयसीपरिपाकपरिपाटिरियन्तीति कथयितुं प्रभवन्ति महान्तो भवन्त एव । यदयं किल शङ्करो जगतामभयंकरः शैशवदशामावसन्नमपि समस्तनिगमतन्मस्तकान्ततन्त्राकूपारपारीणोऽगण्यमहिमालयः सकललोकोपश्लोकितो भवदीयकटाक्षवीक्षणगोचरतां चाधिगतस्तन्मम कुतूहलमतिवेलं कलयति ॥ तदिदानीम्—

यद्याकर्णयितुं क्षमा भगवतां वाचा प्रकाशीकृता ।
श्रेयस्यस्य पुरा कृता वदत तामित्यादरात्प्रार्थिता ।
प्रोवाचर्षिनिदेशतः स भगवान् संसद्युपांशूत्तरं ।
योऽतर्णोज्जरदर्णवस्त्रिजगती संतापि वा तापिनाम् ॥ ४७ ॥
पुरा पुररिपुं पतिस्तव पतिव्रतेऽतोषयत् ।
ततोऽतिमुदमादधत्स विददौ वचः सस्मयम् ।
वरं वरय पुत्रकः सकलशास्त्रमुर्ष्टिधयो ।
मतोऽद्य तव बालिशा उत गतास्त तान् वत्सरान ॥ ४८ ॥
इति कथयति शम्भौ प्रार्थयत्साध्वि नाथः ।
तव निखिलमनीषीस्तुत्यपादं तनूजम् ।
समजनि कृपयालुस्तेन कुक्षौ महेशः ।
हिमकर इव सोऽयं भाति मध्ये सतां तत् ॥ ४९ ॥
सनातनमतं शुद्धमुद्दिधीर्षुः सतीमणे ।
त्वदीयतनुजाकारः परमात्मा विराजते ॥ ५० ॥
द्वैतारुन्तुदवाग्जालस्तत्त्वज्ञानफलेग्रही ।
सुखाकरोति धरणीं साक्षात्क्षेमंकरो हरी ॥ ५१ ॥

२b. °प्यचीकरन् ? ।



इत्यवितथां कथां कथयित्वा तापसजनावतंसः कलशभवस्त्रितुलमुखैः सह निश्चक्राम ॥ ततः—

जातुपुण्यतटिनीजलमध्यं स्नातुमेष समगात्परिगृह्णन् ।
तत्र कश्चन पदं खलु नक्रोऽप्यत्र सत्त्वमगमद्बलनिष्ठः ॥ ५१ ॥
नक्रेण पादः परिपीडचते मे व्याकृष्यते सन्मनुनेव वस्तु ।
न मुच्यते किं करवाणि मातरद्येत्यरोदीद्बत विप्रपुत्रः ॥ ५२ ॥
ततः—  श्रुत्वा पूर्वदशां शिशोः शिवगुरोर्दारादराविष्कृता ॥
क्रोशन्ती वनिता धुनीतटगता दृष्ट्वा रुदन्तं सुतम् ।
हा पूर्वं मम चेन्मृतिः शिव शिव क्लेशो भवेदीदृशः ।
किं वेत्याकुलचेतसा विधुरिता शोकाशि(भि?)तप्ताऽभवत् ॥ ५३ ॥

तदनु शोकानलमुद्दीप्यमानं शमयितुमिव निरर्गलगलितयाऽश्रुधारया कवलितकलेवरां प्रवयोनुरूपसहचरेण संजातकम्पेन कम्पिता कम्पितावयवं पतिविरहशुचा क्लिश्यमानामनाथां जननीमालोक्य मायाकुम्भीरावष्टम्भितचरणतया मध्येऽम्भसि स्तब्धतनुर्द्विजसूनुः सधैर्यमिदमवादीत् ॥

ग्राहव्यथा परिहृता न भवेदिदानीं ।
सकर्षणेन मम संन्यसनं विनैव ।
तेनाऽम्ब तेऽस्त्वनुमतिः परिकल्पये तत् ।
सत्यं तदा गजपतेरिव मोचिता स्यात् ॥ ५४ ॥
कुम्भीरमुक्तो यदि जीवतीति । गम्भीरवाचामवकाशलाभः ।
इतीव मत्वानुमतिं विधाय । सतीवरा तीव्रमथाऽलुलोके ॥ ५५ ॥
संन्यासं मनसा व्यधादथ गुरुर्नो धैर्यधुर्यो महान् ।
मायाकूपवतो ततो जलचरेणामोचि पादं ततः ।
तीर्त्वा तीरमुपेत्य मातरमसौ तां व्याजहारादरात् ।
शोकोदञ्चितयज्व...हि. शमने पीयूषवर्षां गिरम् ॥ ५६ ॥
अये मातः शोकं त्यज भज हरं नश्वरतरे ।
शरीरे विश्वासः[2c] विजहिहि जहीहीह तरसा ।
मया कार्यं यत्ते गतसकलसङ्गेन यतिना ।
तदाशासीथास्त्वं सपदि कलये माऽस्तु तव भीः ॥ ५७ ॥
इति गिरमुदीरयन्तं भगवन्तं समीक्ष्याऽश्रुशबलिताक्षी जननी प्रत्यभाषत ॥
वत्स वत्स ममेष्टं तद्यत्त्वं नक्रमुखाच्च्युतः ।
किन्तु स्रुवाफलं किं मे तत्संस्कर्तुं त्वमर्हसि ॥ ५८ ॥

२c. विश्वासं ?

इति याचितः शङ्करस्तामेवमवोचत्—

नक्तं दिवा सायमपि प्रगे वा मातः स्मर त्वं वशगाऽवशा वा ।
एष्यामि हित्वा सकलं तदानीं मृतौ च संविश्वस संस्करिष्ये ॥ ५९ ॥

इति प्रतिश्रुत्य श्रुत्यर्थविच्छङ्करः करेण गृहीत्वा स्वजनहस्ते दत्वा स्थविरायास्तस्या हितकामनया ग्रामाद्दूरेण स्रवन्तीं स्त्रवन्तीमन्तिकेन वहन्तीं च कृत्वा विषयपरित्याग्यपि विषयान्तरं गन्तुमारभत ॥ तदानीम्—

चूर्णाकूषं(लं)कषा सा निजतटनिकटे वर्तिनं यादवस्य ।
प्रासादं तुङ्गभङ्गैर्जलधरसमये ताडयामास शीघ्रम् ।
मृत्स्नां नुन्नामकार्षीत्सभयमिव समालोच्य कृष्णः पुराणः ।
प्रोचे गच्छन्तमारात्स गगनवचसा शङ्करं देशिकेन्द्रम् ॥ ६० ॥
या विप्रपुत्र निकटं गमिता त्वया सा ।
कल्लोलिनी बहुतरङ्गकराभिघातैः ।
मां क्लिन्दते तदहमत्र चिराय वस्तुं ।
शक्नोमि नो व्रजसि दूरमितस्त्वमद्य ॥ ६१ ॥

इत्यकस्मादुद्भूतामशरीरिणीं वाणीं पार्थसारथिवाणीं विगणय्यऽह्नाय बाहुदण्डाभ्यामुद्धृत्य नेदीयसनिरुपद्रवे देशे प्रतिष्ठाप्याऽत्र चिराय सुखेन संतिष्ठस्वेति संभाष्य भाष्यकारो निष्कारणघृणार्णवो मकरकेतुरिवोपरत्याश्रितः कबर्दीवोन्मर्दितकन्ददर्पाङ्कुरो वैयासिकिरिव वैराग्यनिलयश्रद्धालुजनालंभूष्णुः प्रत्यग्ब्रह्मणि वासिमानसोऽनेकजनपदेषु कृतपदस्तत्र तत्र परमर्मभेदिकलाकण्डूलरसनाञ्चलोच्छृङ्खलगलितशब्दान् परिणताहंकारदुष्परिपाकान् जल्पाकान्निर्जित्य विजयलक्ष्म्या सहायमुपपन्नो नानाविधाटवीमतीत्य नानानोकहसन्दोहच्छायसुखसुप्तक्षुद्रतरक्षूत्सङ्गोपधाननिर्भयनिक्षिप्तमस्तकधेनुतर्णकतया जृम्भारम्भणविदारितवदनलक्षितहर्यक्षदंष्टाङ्कुरान् मृणालभ्रान्त्या कर्षच्चञ्चलमृदुलशुण्डाबालशुण्डालतया च मूर्तिमन्तीमुपशान्तिमिवोपलक्षितां विलक्षणपशुपक्षिनिबन्धितां तिरस्कृतारविन्दबन्धिकिरणां गोविन्दनाथसनाथां सकलशर्मदायिनीं नर्मदातटस्थायिनीं कामपि वनस्थलीमाससाद ।। तस्याः किल वनभूम्याः सौभाग्यमहिमानौ गिरामगोचरौ॥ यतः

रेवाया बहुलोर्मिभिः प्रचलितादम्भोजसंदोहतः ।
प्रस्यन्दन् मकरन्दबिन्दुशिशिरो मन्दानिलः कर्षति ।
किञ्चिच्चीरतर्ति पटाञ्चलमिवाभीकः प्रवालं धुनो– ।
त्यङ्गुल्यग्रमिवाङ्गनामिव लताकुञ्चं पुनः श्लिष्यति ॥ ६२ ॥
बृहन्ति द्विरदाः स्वपन्ति हरयो नर्दन्ति शार्दूलका-- ।
श्चेष्टन्ते किटयः खनन्ति महिषा नाकुं विषाणैरमुम् ।
जिघ्रन्त्यृक्षगणाश्चरन्ति हरिणा बुक्कन्ति कौलेयकाः ।
नृत्यन्ति प्लवगा रटन्ति विहगा न क्वापि रुष्टन्त्यमी ॥ ६३ ॥



अथ यतिक्षितिवल्लभो विस्तारविस्तारसुप्तभल्लूकमल्लस्य मूलतलाश्रितभिल्लस्य कस्यचित्सालस्य च्छायामावसन् मल्लिकावल्लिकामतल्लिकादिवल्लरीनिलीनझिल्लिकाजालैरारचितसंगीतो मन्दगन्धवहाहृतारविन्दमरन्दशीररेण कृतशैत्योपचारो विशिश्राम॥

तदानीमम्बरमणिर्निरवलम्बाम्बरतलसञ्चारपरिश्रान्तो विश्रमितुमिवाशिश्रयच्चरमगिरिशिखरम् ॥ तथा हि—

केचित्पश्चिमवारिधेर्दिनकरः पारं यियासुः परं ।
दण्डं लब्धुमवातरत्यचलमित्याहुर्भ्रमात्पार्श्वगः ।
दण्डोऽस्त्येव स मस्करीन्द्रविधृतां यष्टिं प्रमातुं पुनः ।
संसृत्यब्धिविलंघने पटुतरामित्येव जानाम्यहम् ॥ ६४ ॥

अस्ताचलार्यमशिलानलजालजातै– । ज्वालैर्विधत्तलमलं लसतीति केचित् ।
शङ्कामहे यतिविराडिव तत्र धर्तुं । काषायचेलमवधूनयतीति हंसः ॥ ६५ ॥

ततः– व्योमैनाक्ष्या मिहिरविरहः क्लेशतः केशपाशो ।
बन्धान्मुक्तः प्रसरति किमित्याशु संदेहदायी ।
किञ्चित्किञ्चिद्भुवनवलयं वञ्चयन्नन्धकारो ।
मुञ्चन्मुञ्चन्नतनुतभयं पञ्चबाणेन साकम् ॥ ६६ ॥

तदानीं च— इन्दुः पूर्वधराधरोत्तमशिरस्युष्णीषभावं गतो ।
मन्दं सन्तमसं दिगन्तलसितं प्रोत्सारयन् कान्तिभिः ।
कन्दर्पं जनयन् प्रपञ्चितमहाभाग्यं प्रपञ्चे पुनः ।
नन्दन् कैरविणीं वियोगविधुरामुद्बोधयत्यादरात् ॥ ६७ ॥
कीर्त्या पाण्डुरवस्तुगर्वलहरीसर्वंकषाः सम्पदः ।
शाङ्कर्याः स्ववशीकृता इति पयोराशिः किलाऽक्रोशति ।
किं तद्वन्मम संभवेदिति शुचा पर्याकुले चन्दिरे ।
शङ्काङ्कूरदलानि भान्ति सततं मूढाः कुरङ्गं विदुः ॥ ६८ ॥

अथ क्वचित्क्वचिदुन्व्यञ्चितचन्द्रिकतया चित्रकम्बलमञ्जुले महीरुहच्छाये प्राप्तसुखसुप्तिः कर्मन्दिजनकुञ्जरः प्राचीवधूपरिरम्भसंबन्धितरक्तगन्धबन्धुरसिन्धुरबन्धुबन्धुजीवप्रभप्रभाकरकरविद्रावितमिस्त्रंप्राये प्रभातसमये दरोन्मीलितजलरुहकलिकावितानसमुच्चलितषट्पदपदाघातगलितमकरन्दकराम्बितपरागधूसरितायां मेखलकन्यकायां स्नातुकामनया समागतयोगिनिर्दिष्टां प्रादेशमात्रप्रतीहारां दूरीकृतदरशङ्कां कामपि दरीं दुग्धाब्धितटीमिव गोविन्दसनाथां त्रिप्रदक्षिणीकृत्य दक्षिणामूर्तिमिव मुनिजनगुरुं तद्वर्तिनं शुकप्रशिष्यं तुष्टूषयेदं समाचष्ट ॥

लक्ष्मीनाथस्य विष्णोः प्रियतमशयनं मानुषा यं वदन्ते ।
वीक्षन्ते नन्दिमुख्या यमपि गिरिसुता वामपादाङ्घ्रिभूषाम् ।

यं वावर्वति सर्वं फणिकुलमधिपं यं च विश्वंभराय ।
धर्तेत्याहुश्च तुभ्यं मुनिवृषभ नमः शेषरूपाय तस्मै ॥ ६९ ॥

किच—

शिष्याः शिरोदशशतीमवलोक्य पूर्वं ।
बिभ्युः किलेति दययानुजिघृक्षुरद्य ।
यः सर्वशान्तमुनिवन्दितपादमूलो ।
जातो महान्ननु स एव पतञ्ज्ञलिस्त्वम् ॥ ७० ॥

इत्युदिताचुम्बितभूतकथासुधाचूषणसमध्रुवदानन्दो गोविन्दनाथः कस्त्वमिति तं पप्रच्छ ॥ तदनु दिष्टचा समाधिपदविमुखो भगवानिति हृष्यदन्दःकरणः करुणानिधिः शङ्करस्तं प्रत्युवाच ॥

स्वामिन्नहं न पृथिवी न जलं न तेजो ।
न स्पर्शनो न गगनं न गुणाश्च तेषाम् ।
नापीन्द्रियाणि न मनो न शरीरवान्वा ।
एभ्यः परो जयति यः स शिवोऽहमस्मि ॥ ७१ ॥

इत्यद्वैतानुसारिणीं वाणीं संचूष्य गोविन्दमुनिः प्रमोदात्पुनरिदमभाणीत् ॥

समाधिदृष्टचा वत्स त्वां शङ्करं वेद्मि शङ्करम् ।
यो लोकरक्षणकृते याचितोऽजनि भूतले ॥ ७२ ॥

इति वदितारं यतिनेतारं पादाङ्गुष्ठे पूजयित्वा यतिशशाङ्कः शङ्करः कंचित्कालं यथाविधि वरिवस्यामकरोत् ॥

वैयासिकेः शुकऋषेर्विदितार्थतत्त्व ।
श्रीगौडपादयमिनो वरशिष्यभूतः ।
गोविन्दनाथ इति यः प्रथितानुभाव– ।
स्तस्यैव शिष्यपदतामगमग्दुरु[3] नः ॥७३ ॥

गुरोरनुदिनं कुर्वन् शिश्रूषामथ[4] शङ्करः ।
उवासेन्दुभवातीरे नन्दयन् योगिनां कुलम् ॥ ७४ ॥

तत्र च— अज्ञानतप्तां जनतां गुरुर्नो यथोद्धरत्यार्द्रकटाक्षपूरैः ।
ग्रीष्मोपतप्तां भुवमुद्दिधीर्षुः प्रावृट् तथाऽभूज्जलदाम्बुपूरैः ॥ ७५ ॥

तथा हि — जगत्ययमशृङ्खलं श्रयति सत्पथं मामकं ।
हृतप्रभवसंजरां कृतिमपीति तत्तिष्ठतु ।
कथं स्तनितवैभव[4a] हरति वाग्भिरित्युद्भटं ।

३. °गुरुः ? ।
४. °शुश्रूषा° ? ।
४a. वैभवं ?



तितर्जिषव आगता इव जगर्जुरभ्रे घनाः ॥ ७६ ॥

दिगन्तप्राकारं नगरमनुरुन्धन्तमहितं ।
हरन्तं भीरूणां सुभगपरिरम्भादिकनकम् ।
निदाघं मेघानां रणपटहघोषानुकरणैः ।
घनध्वानैः प्रावृट् प्रतिभयतराद्रावयदरम् ॥ ७७ ॥

प्रचण्डतपनांशुभिर्जनितघोरतापासहा–।
श्रमाम्बुकणकोरकस्फुरितगात्रसुभ्रूरिव ।
घनाभिनववृष्टिभिः करकमुक्तिकातन्तुभिः ।
निषिञ्चिततलावनी विरुरुचे तदानीं क्षणम् ॥ ७८ ॥

तदनु विकटविहायसघटितानां कण्ठीरवारवप्रतिभटरटनारभटीभयंकराणां घनभटानां मुष्टयवष्टम्भितयष्टिप्रतिसृष्टिवृष्टिधाराक्रान्तोत्कृष्टघातामर्षिणो भूगृहवासी ग्रीष्मनराधिपः सहजा विजिगीषयाभ्यमित्रीणं वर्षाकालमनुक्रुद्धः समुत्थितः सजातीयादर्शनदुःखितोऽल्पबलतया विधिवशाच्च विद्रावितः परदुर्गमं रमणीजनवक्षोजभूधरमेव शरणागतम् ॥

तदनन्तरं राजापि मलिनाम्बरभासी भास्वानप्यदभ्रतेजोनिरुद्धदभ्रकः शुचिपुरुषोऽपि दोषाप्रकाशितो विष्णुपदमपि घनमलीमसं हंसकुलमपि दुःखेन दूरं गतं नर्मदाऽपि विषाकुला हरिरपि कृताक्रोशस्तदिदानीं दुर्दिनं संवृतमिति यतिपतिरबाधमानसमाधिनिलीनमानसः सर्वेन्द्रियाणि संजहार ॥

करिवरहस्ताकरा अम्बरसरितो नीरसमानाः ।
अपतन् धारासारा वारिधराणां तदनु समन्तात् ॥ ७९ ॥

क्रूरैर्भूमिरुपद्रवं गतवती तच्छक्तिहीनाः क्षितौ ।
स्थातुं सत्त्वगुणास्त्रिविष्टपपदं प्रापुः पुरा शोकतः ।
यत्यग्रेसररक्षिता भवति सा हृद्येति हर्षात्पुनः ।
संवृद्धावतरन्ति ते किमिति ता धारा हि शङ्काकराः ॥ ८० ॥

तदानीं च— अभूतपूर्वसंपातविलोकनविलोलुपाः ।
हसन्तीव विलोक्यन्ते पुष्पिताः कुटजद्रुमाः ॥ ८१ ॥

शंपा दीपं झटिति गृहीत्वा पाणौ ।
स्वायीध्वानं जलधरमालालीनम् ।
पृच्छन् दिष्टं स्तनितमिषादाकाशे ।
सप्ताश्वोऽयं चरति मृगासक्तोऽपि ॥ ८२ ॥

अद्यैव भूमिरतिरक्तसिलीन्ध्रगुच्छैः ।
पुष्पिण्यभूदभिनवेति तटित्कुमार्यः ।
व्योमस्थलीमुपगताः किमु हस्ततालं ।
कुर्वन्ति वारिदघटारसितापदेशात् ॥ ८३ ॥

अश्रान्तं विटपाः पटत्पटदितिः त्रुटयन्ति तत्र क्वचि– ।
च्छूच्छूकारा......नवरतं भित्तिः परीपत्यते ।
ओतप्रोतमनारतं च तरवः संपातसंपातिताः ।
कुर्वन्तीव नमस्कृतिं जलमुचे गच्छ त्वमद्येति च ॥ ८४ ॥

तदनु विशालाविलसलिलपूरोच्चलितोत्कलिकाविलीनजलजकलिकामालाकुलित-जलाशयामानसाभिमुखप्रयातकादम्बकदम्बकास्फुटितकदम्बकाः प्रावृषेण्याः कादम्बिन्यो गिरिग्रामारण्यतरङ्गिण्यादिषु नक्तंदिवमापञ्चदिनमवर्धिषत ॥ ततश्च—

तमालनीलसद्वेणीपङ्क्तिविराजिताः ।
तिलकप्रियकोल्लासिमुखाः पुंनागसङ्गताः ॥ ८५ ॥
अग्रहारसमाकर्षिगभीरावर्तनाभयः ।
समन्तादसरन्नापः सकलाः प्रमदा इव ॥ ८६ ॥

तदानीं वीचीचयघोषस्पर्धिजरध्वनिप्रार्थनोद्बुद्धैरिव गिरिकन्दरप्रतिध्वनिभिरुद्बोधितो योगनिद्राया जागरूकः शङ्करः करुणानिधिरेकीभूय प्रसृतं जलजालं कलशसलिलेनाऽभिमन्त्र्य कलशभव इव चुलकयांबभूव ॥

ततः सोमनन्दिनीतटवाटवासिनो योगिनो योगसिद्धिमचिरादाप्तः शङ्करः इति संतोषजलपूरमपिबन् ॥

वर्षाकाले ततो याते समभूच्छरदागमे ।
प्रसन्नहृदयो लोके गते मोहे विवेकवत्॥ ८७ ॥
आकाशं प्रविकाशते बकततेः संकाशकाशैस्तदा ।
संफुल्लैर्घनजीवबन्धुकुसुमैर्विश्वंभरा दीव्यति ।
किंजल्कोल्लसितालिपङ्क्तिकमलोल्लासात्तटाकाः क्वचित् ।
स्वच्छाः किं बहुना ह्यनिर्वचनतां प्राप्तं तदानीं जगत् ॥ ८८ ॥

ततः संमोदाद्गोविन्दमुनिनागः शिष्यवरं शङ्करमिदमुदगरीत् ॥

वीक्षस्व सौम्य शरदाद्य[५] नभोऽवकाशे । व्यामुक्ततोयलघवोऽखिलवारिवाहाः
मन्दाकिनीतटगतामरधौतवस्त्रै– । स्तुल्याश्चरन्ति रजताचलसंनिकाशाः ॥ ८९ ॥

किञ्च— स कानीनमौनीशमुनीकृतार्का । इदानीं सदानीतपानीयमेते ।
पिबन्तो महान्तो पुनन्तो नमन्तं ।
दिशन्तो दिगन्तस्य कान्तं चरन्ति ॥ ९० ॥
सौम्य द्विजाधिपतिरेष मयूखभूति– ।
मादाय मेघरवभीतिमुपेयुषीनाम् ।
फाले विनिक्षिपति पश्य दिगङ्गनाना– ।
मुच्चाटनाय तिमिराख्यपिशीचिकानाम् ॥ ९१ ॥

५. दोऽद्य ? ।



तदिदानीं निगमशतसारार्थरहस्यसुधाभाजनं दूरीकृतद्वैतसौगतादिमतमतिमधुरपद-निबन्धितं कैवल्यपदप्रतिपादनकल्यमद्वैतभाष्यं लोकहितार्थमारचयितुमचिरादेव वाराणसीं गच्छतु भवान् ॥

तुषाराद्रावग्रे मुनिसुरपरीते सववरे ।
पराभाणीदेवं स परिषदि पाराशरऋषिः ।
शृणु त्वं तच्चाहं श्रुतिशतशिरोऽर्थं स्फुटममुं ।
वदन्तं संमोदाज्जगद जगदानन्दवचनम् ॥ ९२ ॥

भगवन् द्वैपायन तापसजरवृषभ, भुवने खलु वेदा नानाविधकथनानभिव्यक्तसिद्धान्ता वर्तन्ते । भवताऽपि भवतापिना तादृशमेव भारतं पुराणं योगशास्त्रं ब्रह्मसूत्रं च वितन्यते स्म । तेन कारणेन विप्रतिपन्नाः कतिपयमतिशालिनः यथायथमर्थं कल्पयन्ति । तद्भवानेव सम्यगनन्यथाग्रहणं भाष्यमाभाषतामिति ॥

इत्थं सत्यवतीसुतः सकरुणो मां नाथमानं मुदा ।
सत्यं प्रत्यवदत्पुरा हरसदस्युक्तोऽयमर्थो बुधः ।
त्वच्छिष्यो भविता प्रचण्डमहिमापीताम्बुपूरः कवि– ।
–र्विद्वान्यः स वरं करिष्यति कलौ भाष्यं मदुक्तेरिति ॥ ९३ ॥
त्वयि तत्कथिता विलोक्यते । महिमा भर्गपुरीं प्रयाहि तत् ।
कुरु तत्र जगद्धितां कृतिं । भवदावानलतोयसंततिम् ॥ ९४ ॥

इति देशिकनिदेशात् त्रिपुरान्तकपुरं जिगमिषुस्तद्विप्रयोगपरिकर्शितो दीर्घदर्शी निर्दर्शित-तदीयचरणाङ्गुष्ठमर्चयित्वा क्रमेण संचचाल ॥

ततः पथिकविनोनयनमार्गमासादिता ।
पुरत्रयभिदः पुरी सकलकर्ममर्मस्पृशा ।
मुधा पदमवाश्नुमो द्रुहिणनाथमित्याकुलाः ।
सनन्दनमुखाः सदा दधति यत्र वासं मुदा ॥ ९५ ॥

अहो तस्या रामणीयकम् । तथा हि—

हुंकारोद्घूर्णकिंकरांसधृतदण्डाजाङ्घिकाः कुत्रचित् ।
राजाढ्याः शिबिका मतङ्गजवरा यान्ति क्वचिन्मन्दिरात् ।
कुर्वन्ति प्लुतनर्तनाः......गतयो घण्टापथे घोटका ।
भूमिं फेनकणैस्त्रुटद्गुणगलन्मुक्तानुषक्तामिव ॥ ९६ ॥

किंच—

विक्रेता विपणौ प्रसार्य सकलं सत्या करोति क्वचित्—
शिल्पं शिल्पिजनस्तनोति धनिनां स्थानेषु रम्यं क्वचित् ।
नृत्यभ्रूलतया नटन्ति सुभगा वाराङ्गनाः कुत्रचित् ।
मर्छागानधुरीणगायकगणा गायन्ति गाथां क्वचित् ॥ ९७ ॥

स्वर्लोकवासिपरिकर्शितमेनकाद्या ।
देवाङ्गना पुरभिदः करुणावतारे ।
काशीपुरे वसतिमेत्य लसन्ति सत्य– ।
मित्यादिशन्ति ललना विदुषां च शङ्काम् ॥ ९८ ॥
इन्दोर्गवाक्षपदवीगतिमेत्य सौध– ।
मध्यंगतस्य मधुरं तिलकं निटाले ।
लीलाविनोदचतुरावनिपालपुत्री ।
दत्तं विभाति शशनामकमद्य काश्याम् ॥ ९॥

ततः सकलपुरवरीयस्यां तस्यां वाराणस्यां वरिवस्यां निसर्गमुपगतः कर्मन्दिजन-वन्दितो भगवान् कतिपयैः शिष्यैः सह सुरगुरुसदृशसुधीजननन्दितो विश्वनाथ इव विराज ॥ ॐ॥

प्राज्ञैरप्यकुतोभयो नियमितप्राणैर्न लब्योऽत्र यः ।
प्राप्यैनं तितरीषुणा रघुपतेः कारुण्यरूपं पुरम् ।
आरब्धे परमेश्वरेण सुधिया ग्रन्थे पयोवारिधौ ।
द्वैतीयकमिमं भजन्तु मधुरं प्रेम्णा तरङ्गं बुधा ॥ १०० ॥

इति श्रीकविकण्ठीरवेन परमेश्वरेण विरचिते आचार्यविजयाख्याने ।
चम्पूकाव्ये द्वितीयस्तरङ्गः ॥

---

॥ शुभमस्तु ॥

**॥ तृतीयस्तरङ्गः ॥**

॥ ॐ ॥ मतिविभवमुदारं यो बिभर्ति प्रशान्तो ।
यतिकुलतिलक त्वं प्राप्तवान् ज्ञानतो यः ।
अतिकरुणकटाक्षाक्षिप्तसच्चित्तवृत्ते– ।
र्नतिमहमतिमात्रं तस्य बह्वीं करोमि ॥ १ ॥

अथैकदा काशीपुटभेदने सकलकलापटुर्गतवाक्कटुर्विप्रव(ब?)टुस्तुर्यवर्गफलदायिनं वर्यभर्गपरारूपिणं कर्मन्दिजनदेशिकं मार्गं मार्गमनुमार्गमाणः क्रमेण कामपि पदवीमापद्यत ॥ तत्र च—

संसारोरगदष्टमर्त्यविषये जीवातुरन्यादृशो ।
यत्पादाम्बुजदर्शनं तमनघं दृष्ट्वा पपाताग्रतः ।
प्रोद्धृत्यामुमहस्करेण तुलितं पप्रच्छ कर्मन्दिराट् ।
भोः कस्त्वं वसतिः क्व ते द्विजवरेण्याऽगच्छसि त्वं कुतः ॥ २ ॥



इति संपृष्टोऽतिहृष्टो नवफुल्लमालतीपरिमललहरीमानहारिण्या मधुरमधुमधुरिमार्कर्षिण्या तपोधनवाण्या प्रतिपादितप्रमोदामृतपानेनोपशमितश्रमकातर्यो विज्ञापयांबभूव ॥

भगवन्, भार्गवीभर्तृपदाम्भोजभक्तिदायिन्या कवेरकन्या नाम स्त्रोतस्विन्या समुद्वेल्लितकल्मषे चोलदेशे कृतनिवसनभूसुरतनयो कृतपरिग्रहपरिग्रहणोऽहं भवार्णवसंतरणाकाङ्क्षी भवदीयपादमूलं सेवितुमागतोऽस्मि ॥

स्वामिन् देशिक देशिकाऽद्य दयसे निष्का(र)णं चेत्पुनः ।
शिश्रिषौ मयि किल्बिषाकुलमनस्युज्जृम्भितेत्यद्भुता ।
कीर्तिस्ते सुविमले सुमेधसि कथंकारं तथा जायते ।
जीमूतस्य मरुस्थले जलनिधौ कीर्तिस्तु वर्षेण वा ॥ ३ ॥
अथैवं नाथमानेऽस्मिन् भक्तिमुद्राधुरंधरे ।
सनन्दने दयांचक्रे हृदयालुः स शङ्करः ॥ ४ ॥

अनन्तरमदभ्रगुरुभक्तिविकस्वरहृदब्जानुद्धृतसनन्दनमुखान्तेवासिपरीवृतः परिव्राजकाचार्यवर्यः सिस्नासया भागीरथीं प्रति प्रतिष्ठमानो मध्येमार्गं तटनिकटविकटपथोपसीदन्तं भीषणकलुषघूर्णदीक्षणपरुषभषणाभ्यां भीतद्रुतपशुगणखरतरखुरपुटघट्टनस्फुटितमहीतलसमुज्जृम्भितधूलीपालीकवलितगगनाभिमुखकीलकीर्णैः कालवर्णैः वक्रितवालाग्रचालनसूचितस्वामिभक्तिभिः बहिर्विलम्बमानरसनाञ्चलपरिगलदम्बुकणसिक्तधरणितलैश्चतुर्भिर्विश्वकद्रुभिरनुद्रुतं स्कन्धतलनिक्षिप्तहलिप्रियाकलशसमुच्चलितजललवपारम्परीकोरकितकलेवरजुगुप्सितं कमपि मातङ्गमुद्वीक्ष्य हे चाण्डालक, त्वमितो दूरं गच्छ गच्छेति व्याजहार ॥ सोऽप्येवमप्राक्षीत् ॥ भो यतिकुलपते,

अन्नादिवृद्धं यदि देहमेत– । न्मदीयमप्ये[1] वेमवेहि देहम् ।
चैतन्यतश्चेदुभयं तथैव । त्वं गच्छ गच्छेति कथं ब्रवीषि ॥ ५ ॥
आलोकिता किमु भिदा श्वपचाङ्गनानां ।
वीटीरसप्रतिफलत्यतुषाररश्मौ ।
लोके सुपर्वतटिनी जलबिम्बिते वा ।
मुह्यन्ति हन्त यतयोऽपि नितान्तमेवम् ॥ ६ ॥

इत्यादित्रयीसारार्थप्रकाशिनं पुल्कसवरीयसमन्तकान्तकनिरन्तरदयापात्रमेव ज्ञात्वा संमोदमेदुरमिदवादीत् ॥

भावत्क्या विदितस्वरूपमहिमन् वाग्गुम्भभङ्ग्याऽनया ।
मातङ्गोऽयमिति त्यजामि धिषणां सम्प्रत्यहं निर्भरम् ।
निर्वाणप्रतिपादिनी विजयते यस्येदृशी शेमेषी ।[1a]
विप्रोऽस्तु श्वपचोऽस्तु देशिकवरो नन्तव्यपादः स मे ॥ ७ ॥

१. प्येव ? ।
१a. शेमुषी ? ।

इत्यस्मिन् भणति श्वभिः स ह तिरोभूतोऽन्त्यजोऽयं ततः ।
कर्णोद्ग्रन्थितघण्टिकाध्वनिरणत्काष्ठे महोक्षे स्थितः ।
वामाङ्कासितपार्वतीविलसितो वेदैश्चतुर्भिर्वृतः ।
साक्षाद्भूय जगाद शङ्करमिदं प्रेमार्द्रवीक्षेक्षणः ॥८॥
निष्ठा सम्प्रति शोधिता तव दृढावर्थत्वमस्मादृशां ।
पन्थानं प्रगतः पराशरसुते प्रीतिर्यथा मे तथा ।
त्वय्यप्यस्तितरां विरूढकुमताङ्कूरस्थलं भाष्यकं ।
खण्डित्वाद्वयदीपकं कुरु वरं श्लाघ्यं भवेद्विष्टपे ॥ ९ ॥

इति प्रत्यक्षीभूय दयोपबृंहितव्याजहारं निशामयन् शमधनपुरोगाम्येधमानभय-भक्तिसन्तोषकरम्बितान्तःकरणः पुलकितकलेवर इत्थं तोष्टवीतुमारभत ॥

स्वामिन् सुधांशुकलया कलितावतंस ।
दासोऽस्मि ते भवतोऽद्य[2] शरीरदृष्टया ।
अंशोऽस्मि ते त्रिपुरभञ्जन जीवदृष्टया ।
ज्ञातस्त्वमस्मि सकलात्मतयेति शास्त्रैः ॥ १० ॥

अथाऽन्तर्हिते पुरहन्तरि निरन्तसन्तोषाश्रुस्नपितोऽपि सुपर्वापगापयसि कृताप्लवादिकः परिवृत्य पशुपतिदयासमासादितभाष्यकरणशक्तिः सह शिष्यैः प्रस्थितः शनैः शनैर्निखिलपुण्यतीर्थानि निषेवमानास्तिग्ममुखकण्टकारिकाप्रमुखकण्टकपुञ्जनिबिडित-निष्ठुरप्रस्थरेषु कुत्रचित्प्रचुरमरुषु क्वचित्प्रान्तरेषु क्वचिद्बन्धुरेषु कान्तारेषु मार्गेषु कृतपदपङ्कजोऽपि दुःखाभावैकतानो द्वादशवार्षिको भगवान् व्यामसदृगायामतनुरक्ति मैकाग्रचलदग्रप्रत्यग्रप्र(व्र)ततिततिप्रतिमनिटिलालम्बिकुटिलतापसजटापटलविलोकन-त्रसितनिकटविटपिविटपकुटीरनीडारूढपतत्रिनवडिम्भच्छटापटुरटनविकटपरिसरधरणी-रमणीयं समाधिपदमहामोहार्णवनिलीनमनस्कयोगिकुलकलेवरमयतरुकर्षणशमितकण्डूल-हरिणतरुणवत्सखादिततृण्या मृदुलपर्यन्तं वात्या समुद्वेल्लितक्रमुकनालिकेरकोटिकोटिभिः पुरभञ्जनसमयशिञ्जिनीभूतवासुकिफणधरायासनिश्वासप्रभञ्जनसंजनितसमुच्चलनधनु-स्थितामखरवर्णिनीकबरीभरनर्तनमनुकुर्वाणं सदा वेगसमुड्डीनवालकलशब्दनपत्त्रिव्रातैरहमहमिकोपबृंहितहांकारमुखरमुखदशमुखशिरः कृन्तनाहोपुरुषिकोत्कटविशङ्कटसंकटकङ्क-पृष्ठनीरन्ध्रतास्कन्धनवसुंधरामुद्बोधयन्तं दूरीकृतपरस्परवैरनिर्यातनकथालापं, कृष्णमिवाक्रूरभावितमूर्ति, विष्णुमिवारूढभुजङ्गभुजं क्षीरवारिधिमिव हरिप्रियोपशोभितं कुमुदबन्धुमिव शारदच्छदविशदं, रजताचलमिव स्थाणुगणभीषणं, वैकुण्ठमिव चक्रीचङ्क्रामक्रामितं, भरतमिव रामागमनासक्तं, सुग्रीवसैन्यमिव सगवयशरभं सपनसं च, वालिनमिव तारालापोद्बुद्धं, त्रिदशगणमिव मृतानुपुष्टं, स्वर्गमिव वृषभसनाथमशोकार-पदं च, धरित्रीसुरमिव गायत्रीपवित्रितं, अध्वर्युमिव यज्ञाङ्गसङ्गतं, महाकाव्यमिवा-

२. भगवतो ? ।



विरलसरलं, वृत्तमिव सभ्रमरकूजितपुष्पिताग्रसुकेसरं, सुकृतिमिवोपनतबहुश्रेयसी फलं, दौवारिकमिवागतवारुणातुरं, वियोगिनमिव तापसहितं, (रोहिणी-प्रियमप्यदोषाकरं), सीमन्तिनीजनमिव बहुलचलदलकं, कृतमालालङ्कृतं च, रङ्गतलमिव शैलूषभूषितं, पाणिनीयमिव वृद्धिमुखं, वर्षमिव प्लवङ्गरञ्जितमप्यचपलादुर्मतिविरोधराक्षसजुष्टं, रोहिणीप्रियमप्यदोषाकरं, भीममपि कीचकसखं, सत्त्वैकायतनमपि प्रभूतमन्मथविकारं वटावृतमप्यवटावृतं, नलसेवितमप्यनलसेवितं वाचामगोचरविभवं, नरनारायणनालीकयुगलगलितपरागसुभगं बदरिकाश्रममगमत् ॥

वेदान्तार्थमयं निरन्तरतपः सौम्यैर्वरैस्तापसै –।
–स्तत्रत्यैः सह संविचार्य मधुरं सूत्रस्य भाष्यं ततः ।
तेने चोपनिषद्गणस्य क्रमता निर्मूल्यकैवल्यद– ।
–श्रीमद्भारतसारभूतभगवद्गीतार्थविद्योतकम् ॥ ११ ॥
अमृतप्रतिपादितवैभवस्फुरदत्यद्भुतशब्दबन्धुरान् ।
उपदेशसहस्रिकादिकानकरोद्द्वादशवत्सरे गुरुः ॥ १२ ॥
आम्नायक्षीरवारांनिधिमथनजरीजृम्भदाकारभारः ।
कर्मन्ध्यद्रावुदेत्याखिलकुमततमस्तोमसंकल्पदाता ।
भाष्याखण्डामृतांशुर्द्विजहृदयचकोरौघसंतृप्तिदायी ।
देष्टानन्तामराणाममृतमपि दृढं द्योतते निष्कलङ्कम् ॥ १३ ॥
हित्वा कल्पमनल्पभोग्यफलमालम्बेत चेन्निम्बकं ।
माकन्दं प्रविमुच्य शाल्मलितरुं यद्याश्रयेदादरात् ।
काङ्क्षेन्मातुलपुत्रकं च कदलीकिंपाकमु[2a] त्यज्य चेत् ।
भाष्यं भूष्यमिदं विहाय भजते दौर्मत्यदं दुर्मतम् ॥ १४ ॥

ततो बदरिकाश्रमपदान्निवृत्य पुनश्छात्रसमवायैः संवेतः शङ्कराचार्यवर्यः काशीनगरे कतिपयदिवसान्यतिवाहयांचकार ॥ यत्र च—

प्रवहति शशिमौलेर्मौलिमाला स्रवन्ती ।
सुखयति हृदयानि प्राणिनां च प्रदेशः ।
समुपदिशति शम्भुस्तारकं कर्णमूले ।
निधनमपि विधत्ते मङ्गलं मुक्तिरूपम् ॥ १५ ॥
निर्धूतदुर्ज्ञानझरीपरीवृते काशीपुरीवर्तिनि शङ्करे गुरौ ।
उत्कर्षभक्त्या विनयोपगूहितः शिष्येषु मुख्यत्वमगात्सनन्दनः ॥ १६ ॥
त्रय्यन्तार्थविचारणाचरणतश्चूडामणिं प्राणिनां ।
भक्त्युद्रेकविकस्वरं परतटीवाटीकुटीरं ततः ।
विद्वत्कुञ्जरपुञ्जरञ्जितलसत्कूजोपकुण्ठाञ्चितात् ।
पारे गङ्गमयं कदाचिदचिरादाकारयामास तम् ॥ १७ ॥

२a. सुत्सृज्य ?

सनन्दनयमी तदाभिगमिषुर्विदं नाविकं ।
सकोलमपरे तटे स्थितिजुषं जनैस्तीर्यते ।
दुरन्तभवसागरः स गुरुभक्तदः कीदृशी ।
नदीति मनसि स्मरन्नवततार गङ्गाजले ॥ १८ ॥
...न्तत्क्षणं विकचदम्बुजकुड्मलान् सा ।
गङ्गां च यत्कुतुकतोऽपि पदे पदेऽस्य ।
विन्यस्य सोऽङ्घ्रिकमलं कमले समन्ता– ।
दालोक्य तं मुमु(दि?)रे सखवैरिणश्च ॥ १९ ॥
उन्निद्रहर्षणभरस्रवदश्रुपूर्ण– ।
कर्णायताक्षियुगसूचितभावबन्धम् ।
आलिङ्ग्य तं यतिपतिः किल पद्मपादं ।
नाम्ना चकार भुवने श्रुतपूर्वभक्तिम् ॥ २० ॥

अथ जातु तत्र काशीपुरे प्राक्तनानेकनिर्भरदुष्कृतानुक्रमपरिणतफलायितदुर्मतावष्टम्भसंभावितचार्वाककापालिकसौगतगौतमीयजैमिनीयपाणिनीयपाशुपतगाणपतशाक्तसांख्यसौरवैष्णवादयो दुर्वादिनः खर्वेतरगर्वा दुर्वाक्यदारुकूटेनाद्वैतभाष्यव्रजं श्रुतिसारं भेत्तुमनसा समागता पाराशरिगुरुवैश्वानरे शालभीं गतिमलभन्त । किं च––

उदा(र?)पटिमाङ्गनासखमुखा मखोल्लासिनो ।
विदारितमतान्तरा गुरुमुरारिमुख्याखिलाः ।
सुधीजनवरास्तत[2b]स्फुरदखर्वगर्वाङ्कुराः ।
पराजयमुपागतास्त्रिपुरवैरिमूर्त्यन्तिकात् ॥ २१ ॥
अलं पाकं प्राप्तो गुरुगुरुरयं युक्तवचनै– ।
रलंपाकं प्राप्ताः कुमतविलुठद्धूसरगिरः ।
अशेषा पापानामपि च समतौ तौल्यमुदितं ।
विशेषोऽलंपाकं झटिति गमिताश्चेति विदितः ॥२ ॥

ततः कदाचिदमर्त्यतङ्गिणीतटीपरिसरारामवाटमधिगत्याध्यापितान्तेवासिविश्रान्तमाचान्तकन्दर्पदर्पोन्मेषोपशान्तनन्तव्यपादं भगवत्पादं समया समापाद्य कश्चिन्मन्दगामी स्थविरभूसुरः पिप्रच्छिषुरिदमब्रवीत् ॥

सौम्याऽत्र बालवपुषा प्रतिभासि कस्त्वं ।
किं पालयस्यतिफणीन्द्र इव प्रभासि ।
देहं तव स्फुरति दिव्यमदृष्टपूर्वं ।
पश्यामि मामपि यतो मुकुरे यथास्यम् ॥ २३ ॥

२[b]. ततः स्फुरद० ?



पृच्छन्तमेवमवनीसुरमित्यवोचन् ।
छात्रा गुरो गुरुरयं किल भाष्यकर्ता ।
संसारसागरनिमज्जितमानस ना– ।
मुद्धारणे धृतकृपः श्रुतिसारवेत्ता ॥ २४ ॥
आकर्ण्येदममी वदन्ति भुवने त्वां भाष्यकारं हयहो ।
आस्तामद्य यदर्थपूर्वविदितं सूत्रं तदुच्चारय ।
एवंवादिनि भूसुरे गुरुरहं वेत्तेति गर्वासि नो ।
पृष्टं यत्तदुदीरयामि सह तामित्यब्रवीच्छङ्करः ॥ २५ ॥

इत्थमुपश्रोत्रा प्रवयसा तृतीयाध्यायमधिकृत्य तदन्तरेत्यादिसूत्रमुपन्यस्यतु भवानिति प्रेरितो यतीनामग्रयायीत्थं प्रत्यभाणीत् ।

सूत्रार्थं येऽभिजानन्ति तेभ्यः सद्यो नमो नमः ।
नमो नमः सूत्रकृद्भ्यो गुरुभ्यस्तु नमो नमः ॥ २६ ॥

भगवन्. ताण्डिश्रुतौ जैमिनिजैवलीयपरस्परसंवादकथनोन्मुखोऽयमर्थ इति ॥

इत्युक्तं शतधा विकल्प्य बुधरा...स्थूलमाचिक्षिपे ।
केदारं गतसेतुरम्बुनिकरोद्वाहो यथाऽयं तथा ।
उक्तं सर्वमनूद्य तत्क्षणमसौ कर्मन्दिवज्री गुरुः ।
संचिच्छेद सहस्त्रधाऽद्वयगतं पक्षं च पूर्वं किल । २७ ॥
निर्दुष्टं चाष्टघस्त्रं यतिबुधतिलकौ विष्टपाश्चर्यदात्री ।
विष्टब्धाङ्गौ विवादे विहरणपटिमां ताववष्टभ्य भान्तौ ।
द्रष्टा शिष्टोऽम्बुजाङ्घ्रिर्गुरुगुरुभजनस्तोषतोऽभाषतैव ।
यो विप्रो भाष्यकर्ता सह च विवदते सूत्रकारो हि कृष्णः ॥ २८ ॥
शङ्करः शङ्करः साक्षाव्द्यासो नारायणः स्वयम् ।
तयोर्विवादे संप्राप्ते किङ्करः किं करोम्यहम् ॥ २९ ॥
तदनु शङ्करयती[3] बादरायणिदिदृक्षया सभक्त्युन्मेषमित्यस्तावीत् ॥
विद्यज्जटाहृद्यजटाकुटीरमूर्धा विभूत्या विलसल्ललाटः ।
यज्ञोपवीती धृतचीरवासाः कृष्णो हि साक्षात्कलिदोषहन्ता ॥ ३० ॥
वेदा वदन्ति सदसद्बहिरन्तमेकं व्याप्तं निरन्तमसुखं[4] सुखरूपमाद्यम् ।
यं निर्गुणं च शतशो मुनिवर्यमूर्तिं नारायणो मम स दृक्पथमागतोऽस्ति ॥ ३१ ॥

इति स्तुवाने वेदान्तनिष्णाते यतिपरिवृढे वेदव्यासः करधृतकमण्डलुः सप्तविंशत्यधिकशतसंख्यस्फटिकगुलिकाढ्यजपसरं बिभ्राणस्त्रिदशतटिनीरोधसरणावध्वनीनतामगमत् ॥

३. °यतिः ? ।
४. निरन्तर° ? ।

तदनु तटिनीतीरेऽध्वन्यं कनकद्युतिमण्डलीसहजभसिताकल्पालीकं प्रणम्य जगाद सः।

सह तु सह...न्मन्तुं कृष्णो जगद्धितकाङ्क्षया श्रुतिशतमतं सूत्रं येन
व्यतानि दयालुना ॥ ३१अ ॥

अद्वैतभाष्यं तव संमतं चे– । दास्तां जगत्यां भगवन्निदानीम् ।
मयार्जितं साहसमेव सर्वं । दयावता तत्सहितव्यमेव ॥ ३२ ॥
आकर्ण्य वाणीं मुनिरित्यवोच– । द्वत्स त्वस्मादृशमार्गगामी ।
वैराग्ययोग्याश्रमनिष्ठचेता । श्रुत्यर्थवेत्ता शुकवत्प्रियोऽसि ॥ ३३ ॥

ततः— वाचंयमाभ्यवचनं स निशम्य हर्षा– ।
दुव्यञ्जयन् पुलकजालकमब्रवीत्तम् ।
पैलादिशिष्यवरकोटिषु कोऽहमल्पो ।
दीने तथापि करुणामयि ताइशी ते ॥ ३४ ॥
उन्निद्रकारुण्यतरङ्गितेन । मुनीन्द्रनेत्राम्बुजयोर्द्वयेन ।
भाष्यं समालोच्य दुरुक्तिपुञ्जं । संत्यज्य सर्वं च समीकुरुष्व ॥ ३५ ॥

इति समर्पितं भाष्यं पाणिपङ्कजयोर्द्वितयेनाऽदाय निगूढनिर्भरप्रतिज्ञातस्वाभिप्रायसर्वस्वप्रकाशनमणिदीपमानन्दाद्भुतकुतूहलवेलामारुढः संपश्यन्निदमुदवादीत्–

दुरुक्तिमालोच्य समीकुरुष्वे– । त्येतद्धि ते साहसमेव तातः ।
मद्भावमुद्बुध्य च कः करोति । भाष्यं क्षितावीश्वरमन्तरेण ॥ ३६ ॥
सरसपदनिवेशैर्माधुरीवासभूमि– ।
र्ग्रहणसुभगभावा त्यक्तदुर्बोधवाक्या ।
श्रुतिशतमतयुक्त्या प्रौढिमाधारभूता ।
कृतिरियमभिवन्द्या भारतीभाग्यजाता ॥ ३७ ॥

इत्यूचिवांसं मुनिवतंसं शङ्करः पुनरिदमवादीत् ॥ भगवन् तपोधनसार्वभौम, कारुणिकमकुटतटोपलालितपदकमलसमापिकरणीयो हंसं प्रति काशीनगरीभूषायां मणिकर्णिकायां हेयमिदं देहं विहाय निःश्रेयसपदं गमिष्यामि तद्भवान् कृपया क्षणमास्तामिति ॥

पर्यालोच्य ततोऽभ्यधान्मुनिशशी मैवं कृथास्तत[5] हे ।
वर्तन्ते किल पण्डिता भुवि मतिप्रागल्भ्यसंजल्पिताः ।
तान्निर्जित्य सदैकमुक्तिकथितं भाष्यं भवान् ख्यापयेत् ।
नो चोद्रागवघाक्ष्यते लयपदं ज्ञानं कलौ मुक्तिदम् ॥ ३८ ॥

अतः— मदीयानन्दराजीवोन्मेषणे हंस सम्प्रति ।
जाग्रत्कृतिकरेशानकृपया ते वरं ददे. ॥ ३९ ॥

५. °तात ? ।



प्राग्धात्राष्टसमाः कृतास्तव मिताः प्राप्तास्त्वयाऽष्टौ पुन– ।
र्वर्धन्तां शरदोऽघ[5a] षोडश पुनर्भूतेशकारुण्यतः ।
तेन त्वं जयताद्बुधैः क्षितितलेऽप्याचन्द्रतारं नुतं ।
भाष्यं च स्वभुवः पदे पद इदं मध्येसभं भूषताम् ॥ ४० ॥

इत्थमाचक्ष्य तिरोभूते वेदव्यासे हर्षाश्रुपरम्परैव तद्वियोगपरिणतशोकस्याऽपि संवर्धितेवासीत् ॥

तदनु शमधनपुरोगोऽपि व्यासनिदेशतो दिग्विजयपरतन्त्रान्तःकरणतया प्रतिष्ठमानः क्रमेण लोकायतमतं क्षुन्दानः पाषण्डमतं भिन्दानस्तार्किकान् रुन्धानः प्रत्यगात्मानं विन्दानः परमानन्दं बिभ्राणः प्रौढतरवाणी शारिकाक्रीडानीडान् विवादकेलिसर्वधुरीणान् भास्करगुप्तविद्येन्द्रप्रभृतीन् कृतिकुञ्जरान् विजयमानः प्रयागक्षेत्रमुपासदत् ॥ तत्र च जाह्नवीमित्यनावीत् ॥

मातर्यतोऽस्ति भवती कितवावतंस– ।
भोगोपयोगिरसबन्धुरिता सिता च ।
निःशेषकर्महरणे दृढबद्धदीक्षा ।
युक्ता ततो भवति तेऽद्य सुरापगाख्या ॥ ४१ ॥
हंसा श्रुतापि हरमौलिधृताऽपि मात–।
रस्पृश्यमस्थितिचयं वहसे किमर्थम् ।
आ ज्ञातमद्य तव चित्तगतं नवीन– ।
भतेशभूषणकृते किल तद्भासि ॥ ४२ ॥
प्रयातः काशीं यो नष्टपापोऽपि सोऽयं ।
भवे नव्यामुक्तो जायते सर्वलोकः ।
अहो त्वं तत्रत्या बद्धचित्ता भवे भू– ।
र्विभिन्नं चारित्र्यं जह्नुपुत्रि त्वदीयम् ॥ ४३ ॥
खरकिरणसुताली सङ्गता फेनगन्धो– ।
त्कलनचतुरवीचीहस्तमाला मनोज्ञा ।
कमलमुकुलजालं कर्षयन्तीव शम्भो ।
सुरसरिदतिशुद्धा दृश्यसे ह्यर्चनार्थम् ॥ ४४ ॥

इति भागीरथीं संस्तुवन्नन्तेवासिभिः सार्धं त्रिवेण्यां जननीमपि स्मृत्वा कृताभिषवस्तीरपरिसरारण्यभूभागमलंकरिष्णुर्न्यग्रोधमहीरुहमूले क्षणं व्यातिष्ठत ॥ तदानीं च तपोधनतैकतानेन भगवताऽनेनाश्चर्यमुखी पथिकानां वार्ता काऽपीत्थमश्रावि ॥

इनसभमनुयातः क्रोधनो विप्रयोगात् ।
दृढबहुलगवीभिः क्रूरकर्मानुविद्धम् ।

५a. द्य?

रघुपतिरिव रक्षःसैनमुन्मूल्य[6] जैनं ।
मतमजयदिलायां यः पुरा भट्टपादः ॥ ४५ ॥
महाकुलीनतार्हन्ती चातुरगणबन्धुरैः ।
बहुमन्तव्यपादोऽयं तुषाग्निमुपतिष्ठते ॥ ४६ ॥
उदग्रगिरिकूटाद्यः पतने त्रासवर्जितः ।
सोऽयं महानुभावोऽद्य ज्वलनात्किं बिभेदिति ॥ ४७ ॥

तदनु सहसा समालुलोकिषुः संचलितः प्रभाकरप्रभृतिभिः साश्रुमुखैः शिष्यशतैः परिवृतस्तुषपुञ्जपिञ्जरितधनंजयरञ्जिताकष्ठकलेवरं कुमारिलमुपससार ॥

हर्षोज्जृम्भितबाष्पतिम्यदनलप्राग्भारवत्तौषिको–।
द्धूमच्छप्रविनिर्गतस्वदुरितो दृष्ट्वा ततः शङ्करम् ।
वर्षाधर्षितधूमयोनिपिहितश्रीपूषतुल्याननो ।
भट्टोऽनादिगवीधुरंधरवरः शिष्यैस्तमापूजयत् ॥ ४८ ॥
वृत्तिं कर्तुमना अदीदृशदथो भाष्यं मुदा देशिको ।
दृष्ट्वा हेति कुमारिल स्म भगवन् दीक्षामकार्षं न चेत् ।
भिक्षू स्यां च निबन्धमस्य विमलं तन्वे न मे तादृशं ।
भाग्यं संप्रति दृष्टिमार्गमगमद्दिष्ट्यैव निष्ठो भवान् ॥ ४९ ॥

तदनु तुषानलप्रवेशकारणं विवक्षया परिक्षुभमाणसुधाजलधिमध्येजलनिमज्जन-साहसिकसुन्दरमन्दरमहीधरधैर्योन्मेषणमोषणनिष्णातधिषणाभूषणः सर्वज्ञजेता पुनरिद-मकथयत् ॥

पुरा किल भगवन् पिशुनैरिवापन्ननिर्वेदमतैः पातकैरिव करभारोपणयोग्यैः कव्या–दैरिव दीनारातिमत्तैः, उडुभिरिव राजाश्रितैः, कामुकैरिव भीरूणां काममत्याहितकरैः समुन्नद्धैः बौद्धैः परमास्कन्दिते जगतीतले विजिगीषया प्राप्ततदीयशरणोऽनुद्धतोऽहं लोकायतसिद्धान्तमश्रौषम् ।

प्राणिन्दीत्स तथागतः प्रतिभया वेदान् कदाचिद्गुरुः ।
श्रुत्वा मे[6a] पतदश्रु तच्च विविदुः पार्श्वस्थिताः केचन ।
मे मत्वा बलवान् द्विजातिरचिरात्प्रत्यादिशेन्मन्मतं ।
तेनाऽयं सहसा निरस्य इति मामापातयत्सौधतः ॥ ५० ॥
तत्रातुरत्रसितविह्वलनेत्रतोय– ।
सम्पातदर्शितसृतिं प्रविगाहच्य सौधात् ।
जीवेयमुच्छ्रिततलादपि पातुकोऽहं ।
वेदाः प्रमाणमिति चेदिति वागभून्मे ॥ ५१ ॥

६. °सैन्य° ।
६a. मेऽपत°? ।



चेदिति संशयभाजः पततो मम किल कीलिता दृष्टिः ।
एका वराटिकाऽभूद्विद्वन् तावान् हि दैवसंकल्पः ॥ ५४ ॥
एकवर्णोपदेष्टाऽपि माननीयः प्रकीर्त्यते ।
उपदेष्टा तु शास्त्राणां वचनीयस्ततः किमु ॥ ५५ ॥
अधीत्य सर्वज्ञगुरोः सकाशा– । दघातयं तत्कुलमेव सर्वम् ।
अहं पुनर्ब्रह्म निराकरिष्णु– । र्दोषद्वयो[7] नैव तुषानलस्थः ॥ ५७ ॥
जातं भवन्तममृतांशुकलावतंसं ।
दुष्टं मतं भुवि विमर्दितुमादरेण ।
जाने पुरैव मम ते पददर्शनं चे– ।
द्भ्रूष्णु : किमीदृशमहं व्रतमाचरामि ॥ ५७ ॥
गुरो भाष्यं कृतं श्रुत्वा व्याख्यातुं मुदभून्मम ।
यथा शबरभाष्येऽद्य किं मया गतचिन्तया ॥ ५८ ॥
इति कथितमुदारं स्मेरवक्त्रेण तेन ।
श्रवणयुगलसृत्या चूष्य स व्याजहार ।
जिनजनकृतपीडानोदनार्थं जगत्या– ।
मुदितमचलकन्यानन्दनं वेद्मि भट्टम् ॥ ५९ ॥
अभिलष्यसि चेदङ्ग कीर्तिं तत्तादृशीमिह ।
उज्जीवयामि कार्पण्यं त्यज कुम्भोजबिन्दुना ॥ ६० ॥
इति कथितं निपीय लोकायतिकजित्वरं पुनरित्थमचकथत् ॥
इच्छाविसृष्टजगतो भवतः कियन्म– ।
दुज्जीवनं शिव तथापि गृहीतदीक्षाम् ।
मोक्तुं मनोऽनुमनुते न निवृत्तकल्पां ।
तत्तारकं समुपदिश्य कृतार्थयेथाः ॥ ६१ ॥
मार्गस्य प्रचिकाशिषास्य यदि ते जय्येतरः कर्मणे ।
जेयो मण्डनपण्डितः परयशो लुण्टाकवागुद्भटः ।
तस्मिन्नद्य जिते जितं जगदिदं कुर्याद्भवान् साक्षिणी– ।
मुम्बां[7a] तस्य[8] कुटुम्बिनीं विधिवधूरूपान्तरां तत्र च ॥ ६२ ॥
मनोरथस्तत्र भवेदखण्डो । माहिष्मती मण्डनमण्डनौकः ।
प्रपद्य पद्यामपि तावकीनां । संस्थापयत्वार्यं भवानिदानीम् ॥ ६३ ॥
स्वामिन्नदभ्रकरुणातिमितान्तरङ्ग । संतिष्ठतां क्षणमिह प्रतिपद्य दृष्टिम्
योगीन्द्रहृत्कमलमध्यविहारिणस्ते । यास्यामि मोक्षपदवीमदवी(य)सीं च ॥ ६४ ॥

७. दोषद्वयेनैव? ।
७a. मम्बां?

इत्यूचुषः सर्वज्ञजिष्णोरुत्तारकं कर्णे किमपि जजाप शङ्कर : ॥
अथोपदिष्टः सोऽनेन ब्रह्माद्वै(तं)कुमारिलः ।
प्रपदे वैष्णवं धाम निर्मुक्तदुरितान्वयः ॥ ६५ ॥

तदनन्तरं गुरुः प्रौढविद्योत्कटवाचाटकरटिघटघट्टार्थशिरस्तटपाटनकण्ठीरवस्य मण्डनपण्डितस्य भवनं समाढुढौकिषुरम्बरचरमार्गेण माहिष्मतीपुरं समया समागम्य तरङ्गिणीतटसंनिकृष्टसरणिमध्ये समायान्तीरुदभारानूनकुटभारिणीरबलाः काश्चिदा-लोक्येत्थमप्राक्षीत् ॥

भद्रा भुजावल्लिनिपीडयमानघटीकनत्पीडनकटीमनोज्ञाः ।
महामतेर्मण्डनपण्डितस्य कुत्राऽस्ति गेहं वदताऽम्बुजाक्ष्याः ॥ ६६ ॥

इति पृष्टा विश्वरूपगृहचेटीजना गगनमार्गेणाऽयान्तं सूर्यान्तरशङ्काकरं शङ्करमुनिं महापुरुष इति विज्ञायाऽनन्दविस्मेरवदना प्रत्यभाणिषुः ॥

भगवन्निदानीं दिव्यमार्गगामित्वं तव महापुरुषतां द्योतयति । तव शरीरमपि त्रिलोचनलोचनागोचरपञ्चशरं स्मारयति ; ततो भवान् किं गन्धर्वः किं किंनरः किं सिद्धः किमिन्द्रोऽसि उत चन्द्रोऽसि, अथवा मार्तण्डोऽसि, आहोस्विद्विरिञ्चिरसि, किमुत विष्णुरसि, अथवा शङ्करोऽसि, किमर्था मण्डनमिश्रवेश्मविचारणा ॥

वनिताभिर्मोदिताभिरिति पृष्टो हराकृतिः ।
तं जेतुमनसाऽऽयातो यतिरित्यब्रवीत्पुनः ॥ ६७ ॥

इति तदीयवचनं निशम्य सुन्दराधरा सुन्दरीमण...पुनरित्थमगादिषुः ॥

स्वतः प्रमाणं परतः प्रमाणं कीराङ्गना यत्र गिरं गिरन्ति ।
द्वारस्थनीडान्तरसंनिरुद्धा जानीहि तन्मण्डनमिश्रगेहम् ॥ ६८ ॥
जगद्ध्रुवं वा जगदध्रुवं वा......मण्डमिश्रगेहम् ॥ ६९ ॥
फलप्रदं कर्म फलप्रदोऽजः......मण्डनमिश्रगेहम् ॥ ७० ॥
श्रुत्वैतद्वचनं प्रमोदभरितः श्रीविश्वरूपालयं ।
बुद्ध्वा बद्धकवाटमुत्तमगुरुः खं योगशक्त्योत्पतन् ।
आसन्नस्थितकृष्णजैमिनिमुनिं मध्येऽङ्कणं मण्डनम् ।
विभ्रेजे निकषा तुरीयशिखिवत्त्रेताग्निशाले तदा ॥ ७१ ॥

तदनन्तरं ताभ्यामृषिवृषभाभ्यां स्वागतादिभिर्बहुमानितः संन्यासिजनकेसरी प्रवृत्तितन्त्रैकरतस्य कर्मशूरस्य विश्वरूपस्य नेत्ररोगिणो महाप्रदीप इव नितरी विषादकारी बभूव ॥

क्ष्माभृत्कठोरतटदर्शितवप्रलील– ।
दिग्दन्तिदन्तसहजापितकीर्तिराश्योः ।
तत्राऽनयोश्च गुरुकर्मठयोस्तदानी–।
मन्योन्यमाविरभवद्वचनं विगर्ह्यम् ॥ ७२ ॥



मुण्डी कुतो मण्डन हन्त मुण्ड्या– ।
कण्ठाद्धि पृच्छामि तवैव मार्गम् ।
किमाह मार्गो जननी त्वदीया ।
मुण्डेति चष्टे विबुधैवमेवम् ॥ ७३ ॥
भवानपृच्छत्प्रतिवक्ति पन्था ।
भवन्तमेवायमपृच्छकं माम् ।
ब्रवीति किं वा वद वावदूक्य ।
त्वया न बुद्धं परमे तदित्थम् ॥ ७४ ॥
पीता किं मदिराननं[8] मण्डन सुरा सर्वत्र गौरी त्वया ।
तद्वर्णं विशदं विलोकितमये जानामि वर्णं ह्यहम् ।
त्वं संवेत्थ रसं कलञ्जभुगभून्मत्तो वृधाकद्वदः ।
सत्यं त्वं पितृवद्ब्रवीषि समभूत्त्वत्तः कलञ्जाशनः ॥ ७५ ॥
कन्थामहो धरसि गर्दभदुर्भरां च ।
चूडोपवीतवहने जड को हरोऽभूत[9] ।
पित्राऽपि दुर्भरतमां तव संवहेऽहं ।
चूडोपवीतवहनं श्रुतिभारकारि ॥ ७६ ?॥
उपयमविमुखवधूटीत्राणे शक्तेरभावतो मूढः ।
शिष्यकपुस्तकभारोत्कण्ठात्वन् ब्रह्मनिष्ठता ज्ञाता ॥ ७७ ॥
गुरुवरिवस्यालस्यात्स्वगुरोः शरणात्समावर्त्य ।
संप्रति मदिराक्षीणां सपर्यन्तः[10] कर्मनिष्ठता ज्ञाता ॥ ७९ ॥
याभिर्धृतोऽसि जठरेऽसि विवर्धितोऽपि ।
ता मूर्ख निन्दसि कथं तु कृतघ्नताऽहो ।
स्तन्यं भगात्त्वमपिबः समभूश्च यासां ।
ताभिः कथं तु रमसे पशुवत्कुबुद्धे ॥ ८० ॥
विरहत्यामवाप्तस्त्वमविवाह्याग्निर्वर्जितः[11] ।
ब्रह्महत्यामवाप्तस्त्वमज्ञात्वा ब्रह्म केवलम् ॥ ८१ ॥
विप्रलभ्य प्रतीहारानागतः स्तेनवत्कथम् ।
अदत्वाऽन्नं यतिभ्यस्त्वं भोक्ष्यसे स्तेनवत्कथम् ॥ ८२ ॥
क्व ब्रह्म क्व च दुर्मेधाः क्व संन्यासः क्व(च?) वा कलिः ।
मन्येऽद्य भक्तकामेन वेषोऽयं योगितां धृतः ॥ ८३ ॥

८. मदिरा न ? ।
९. भरो ? ।
१०. सपर्यंतः ? ।
११. वीर° ? ।

क्व स्वर्गः क्व दुराचारः क्वाऽग्निहोत्रः क्व वा कलिः ।
मन्ये मैथुनकामेन वैषोऽयं कर्मणा[12] धृतः ॥ ८४ ॥
इत्याद्युल्ल......दुर्वचोजननभूवक्त्रं ततो जैमिने– ।
रीषद्विस्मयसूचकाग्रदशनं......तपात्रं प्रति ।
व्यासोऽव्रोचदिति स्म वत्स विदितात्मा वन्दनीयो यती[13] ।
सोच्चण्डं तव चण्डिमाप्रकटनं नो साम्प्रतं साहितम् ॥८५ ॥
दौर्मत्यकृतकालुष्यपरिभूतं मनस्त्यज ।
विष्णुरभ्याग[14] ति सपर्या यतिनां वरम् ॥ ८६ ॥

इति सत्यवतीतनूजभणितिपरवशमनोनिर्धूतधीचापलो विश्वरूपः ससंभ्रममुत्थाय विधिवदर्घ्यपाद्यादिभिरर्चयित्वा तपस्विजनमान्यं शङ्करयतिनं भैक्षपरिग्रहणाय वरयामास ॥ तदानीं कर्मन्दिगुरुरपि सुमन्दहासमिदमभ्यधात् ॥ भोः सुधीजनशिरोमणे, विवादभिक्षाकाङ्क्षया भवन्तं निकषा समागतोऽहं प्राकृतभिक्षां नाऽभिलषामि ॥

वेदान्तसिद्धान्तमपाकरिष्णून् । वराकजल्पाकजनान् विजेतुम् ।
बद्धादरोऽहं वद वा विवादं । श्रयस्व वा दर्शनमस्मदीयम् ॥ ८७ ॥
इति निशम्य विवादकुतूहली परमतप्रतिमल्लवदावदः ।
स्मयविकस्वरवक्त्रसरोरुहो । वचनमेतदुवाच स मण्डनः ॥८८ ॥
विवादपरिबृंहिते मयि यते स वाचस्पतिः ।
सहस्त्रफणमण्डलीभ्रुकुटिभीमशेषोऽपि वा ।
पुरो वदितुमक्षमो ननु कथं मतं कृत्रिमं ।
श्रये श्रुतिविबोधितं मतमनुत्तमं हा त्यजन् ॥ ८९ ॥
कदाचिदपि पण्डितो निपुणमण्डितः खण्डितो ।
भविष्यति महीतले सह च तेन वादोऽपि मे ।
इति प्रतिदिनं मुदा कवलितं मनस्तं स्वयं ।
जहामि समुपागतं कथमहं कथोत्पादिनम् ॥ ९० ॥
साक्षी यतिक्षितिपिते तदु सर्वतन्त्रः ।
कार्यो विपर्ययवदाश्रमतापणोऽपि ।
हुंकुण्डरीषणकृतारववद्विवादः ।
किं कण्ठशोषणकृते भवति प्रपञ्चे ॥ ९१ ॥

तदानींमिति विवादकौतुकितमागा...माणे म...ने सति संशृण्वानेन यतिभूपतिना जयपराजयविवेचनविधाने वरीवर्यमाणौ वर्यमानौ भगवन्तौ पाराशरिजेमिनी सादरमिदमवादिष्टाम् ॥

१२. कर्मिणां ।
१३. यतिः ।
१४. भ्याग (तश्चे ?) ति ।



वत्स विश्वंभरायां यां वाङ्मयीं जानते बुधाः ।
तत्स्थाने साधु कान्तां तां साक्षिणीं कुरु मण्डनीम् ॥ ९२ ॥
चञ्चल्ललाटतपरश्मिकेलिर्मध्याह्नवेलां समतीत्य हेलिः ।
क्राम्यत्ततः सम्प्रति कर्मकालः शौवस्तिकी भाति विवादलीला ॥९३॥

तदनन्तरमित्थं तपस्विजनपुङ्गवोदीरितमण्डनोऽपि बहुमानाऽह्नाय माध्याह्निकसमुपस्थितकर्म समाप्य भगवतीं मुनित्रयीं भोजयित्वा विश्रमाय शिष्यजनवीजमानमृदुलसुरभिलतालवृन्तपवमानाकूरपरम्परामुपाहरत् ॥

अथ जिगमिषुशमधनयुगमति–
नयनपथविषयितमभवदचिरात् ।
समगमदयमपि यतिपतिरति– ।
शिशिरपुरनिकटतटलसदटवीम् ॥ ९४ ॥
ततस्तत्रत्यवार्तायै स्पृहयद्भिर्निजैर्यतिः ।
संलापं सह कुर्वाणस्तां तमीं नावबुध्यत ॥ ९५ ॥
परेद्युराम्रेडितताम्रचूडकुहूरवे जाग्रति काल्यकर्म ।
अह्नाय निर्वाप्य विनद्धचिक्कं तं मण्डनं प्राप समं स शिष्यैः ॥ ९६ ॥

ततस्तदानीं निःशेषविद्यावेदिनीं मुनिबहुमानितां वनितामुभयसंमतप्रतिभुवं परिकल्प्य गीष्पतिकल्पकतिपयप्रवीणपरिष्कृतामास्थानीमध्यासामास सकलाचार्यवर्यो मर्यादामित्थमतनुत ॥

ब्रह्मैव सत्यं श्रुतिमूर्धसिद्धमानन्दचिन्मात्रमपीष्यमेतत् ।
जीवेशयोर्नामिभिदेति साध्यं नो चेत्सिताच्छादनमाश्रयामि ॥ ९७ ॥

इति भगवदुदीरिते विदिते वादात्तगन्धीकृतबहुगन्धान्धितपरिपन्थिवसुंधराधुरंधरपूजितो धिषणयातिधिषणफणिनेत्रनैपुणो मण्डनोऽपि निजां प्रतिज्ञामित्थमचकलयत् ॥

प्रमाणं वेदान्तो न भवति नितान्तं पुनरिमां ।
प्रमाणं मीमांसागिरमचरमां साधितुमलम् ।
सुकर्मभ्यो मुक्तिः समतनुभृतामीप्सिततमा ।
न चेत्साध्यं भोस्ते वचनविपरीतं भवतु नः ॥ ९८ ॥
जानाति चेत्किं च जयाजयं सा । वाणी न चेत्संसदि मे वधू : सा ।
इत्थं निशम्येयमनिन्दितात्मा । देवी च वादे निषसाद साक्ष्ये ॥ ९९ ॥
विद्वांसौ तौ प्रवीणावथ विगतभियौ शिष्टभूयिष्ठगोष्ठ्यां ।
कम्पस्वेदादिदूरौ सपदि विरचयामासतुः साधुवादम् ।
क्षिप्त्वा कण्ठे तयोश्च स्रजमजयमियं वक्ति तस्यैव यस्मिन् ।
म्लाने त्यक्त्वा प्रयाताऽखिलनुतललना स्वीयकार्यानुरोधात् ॥१००॥

ततो वादविजृम्भोत्थशब्दझर्झरनिर्झरौ ।
सुमेधः पादबन्धूरौ तौ शैलाविव रेजतुः ॥ १०१ ॥
विशङ्कटमलम्पटप्रतिभटार्भटीसंकट– ।
प्रसङ्गपटुवाङ्नटी कटकघण्टिकाशिञ्जितम् ।
दिशातटमदोत्कटां करिघटां मुदा नाटयन् ।
पाट विकटोटजं चटुपसृष्टिकर्तुः पुनः ॥ १०२ ॥

तदनन्तरं दिवामध्यमुपगते दिवाकरे सा वरवर्णिनी प्रसङ्गपरतन्त्रसर्वतन्त्रौ यतिं पतिं च भिक्षायै वैश्वदेवाय च वरयांचकार ॥ तदनु च कृतकरणीयौ तौ पण्डित-पुण्डरीकौ यथापूर्वं प्रसङ्गं कलयांबभूवतुः ॥

इत्येवं पञ्चषा घस्राः समतीयुः समास्तयोः ।
श्रोतारोऽथ च मन्तारो धीरास्तत्राढुढौकिरे ॥ १०३ ॥
तदानीमायातं द्विजकुलमगुण्येतरतरं ।
तयोर्वादे तावद्विगतगणनं लोलुपतया ।
मखाशानां वृन्दं मणिगणकनत्स्यन्दनवरे ।
स्थितं यावव्द्योमस्थफलमलमकार्षीद्विधिमुखम् ॥ १०४ ॥
दिविषन्निमिषाभावः सार्थक्यमवहत्तदा ।
संशद्बगुणमाकाशमिति गौतमवागपि ॥ १०५ ॥
क्रीडानिर्भरपक्षिरकलसत्पक्षाग्रविक्षोभण– ।
–क्षुभ्नत्क्षीरसरित्पतेः कलकलध्वानार्भटीदुर्भरैः ।
प्राक्प्रत्यङ्मुखवीचिभिः सहचरान् वाचा विजम्भान् तयो– ।
र्वक्तुं न क्षमते सहस्त्रवदनः का वा कथा मादृशाम् ॥ १०६ ॥
संमोदादनुवर्तिनां निशमितुं द्याव्यापृथिव्योः स्थलीं ।
प्रत्येकं यदि कर्णबुद्धिरसनादोष्णां सहस्त्रं सदा ।
तादृग्वादविजृम्भमाणपदसंघाटं तदैकाहिकं ।
श्रोतुं ज्ञातुमुदीरितुं च लिखितुं तैर्भूष्णुभिर्भूषते ॥ १०७ ॥
युक्तिश्रुतिभ्यामिन्धाने यतीशवचनानले ।
मतमित्यनितं वक्तुं ग्लाना माला ततोऽभवत् ॥ १०८ ॥
अथाऽभिमानोदरभरिर्विश्वरूपसूरिर्विजितंमन्योऽपि इदमब्रवीत् ।
जीवेशयोर्यतिवरा मनसि ह्यभेदं ।
मानं मनागपि न तत्र वयं प्रतीमः ।
नन्वस्ति मानमनुभूतिरिहेति चेन्न ।
किंचिज्ज्ञसर्वविषयज्ञतयो[१५] श्रुतत्वात् ॥ १०९ ॥

१५. °तयोः ? ।



न चाऽत्र सर्वोनिषनिषद्विरोधो[१६] ।
भेदे यते संभवतीति वाच्यम् ।
या द्वा सुपर्णा सयुजा सखाये – ।
त्येषा श्रुतिस्तत्र न बाधते किम् ॥ ११० ॥
इत्युद्घाटितयुक्त्यनन्तपदसंघाटं महावैदिकं ।
वादोल्लासिकुरङ्गकूटविचकच्छार्दूलविक्रीडितम् ।
उद्घाटय श्रुतियुक्तिजालमचिरादच्छेद्यमानन्दवान् ।
मध्ये संसदयं जिगाय भगवानीशावताराकृतिः ॥ १११ ॥

तदनु दलितमालतीकुसुमनिचयकीलितां निजधवगललम्बितां गतरुचिमपि मालिकां निशामयन्ती पुरन्ध्रीपराध्यापरदुराराध्यमाराध्यपादं विजश्रीविहारभूमिं संयमीश्वर-मिति प्रतिनिवेदयामास ॥

लोकप्रियंकार यते मुनीन्द्रः कोपी पुरा पङ्कजवासिसंसदि ।
शापं ददौ मह्यमथार्थितः सन् चक्रे भवत्पादविलोकनावधिम् ॥ ११२ ॥

इति निगद्य नालिकासनसदनाभिमुखपद्यामासाद्य प्रयान्तीं तां वनदुर्गामन्त्रेण संनह्य सकललोकरसनर्तिनीं लोकेशमनुवर्तिनीं भवतीं जानामीति संस्तुवन् भगवात्पादः समक्राक्षीत् ॥

अथ मतिनुन्नपन्नगपतिनैपुण्यः पुण्यकाष्ठापराजयमापन्नतयाऽऽपन्नशरण्यं संन्यासि-मान्यं सविनयमवादीत् । भो भोस्तापससार्वभौम भाद्रमातुरो भगवान् त्रिकालप... ज्ञानी कथमलीकसूत्रं कलयतीति विचिकित्सामीति ॥

ततस्तु कलयामास योगीन्द्रः सर्वसंमतम् ।
जैमिन्युपज्ञं सूत्रार्थं स समञ्जसमञ्जसा ॥ ११३ ॥
तदनु तदनुमानं मन्यमापोपनानं ।
मनसि नमनपूर्वं जैमिनिं चिन्तति स्म ।
सपदि स मुनिसोमः संनिधिं प्राप्य सभ्यं ।
गृहिणमवददेवं देववन्द्यं सहासम् ॥ ११४ ॥
वत्साद्य तत्र भगवान् यतिपुङ्गवोऽय– ।
मूचे यमर्थमयमव रहस्यभूतः ।
नो वेत्ति कश्चिदपि साधुसमग्रभाव– ।
मेनं विना जगति तेन न वन्दनीयः ॥ ११५ ॥

१६. सर्वोपनि° ? ।

परमिदं मम वचनं निश्श्रेयसकरं सादरं शृण्वन्तु गृह्णन्तु हृदि बध्नन्तु रोदसी मण्डनामण्डनप्रभृतयः पण्डिताः ॥

आद्ये युगे सत्यमुनिद्वितीये दत्तस्तृतीये शुकतातपादः ।
सोऽयं कलौ शङ्करमस्करी मे ज्ञानप्रदाः शैवपुराणसिद्धाः ॥ ११६ ॥
अयं हि शम्भोरवतारमूर्तिर्भूतादि सर्वं स च वेत्ति देवः ।
महर्षयः सन्ततमेनमेव मृग्यन्ति हृद्येव सुहृद्यहृद्याः ॥ ११७ ॥

इत्युदीर्याऽन्तर्हिते तापसार्ये यायजूकाधिपतिरेकदैव निपतद्भिर्नीलोत्पलकान्ति-सर्वंकषैर्भूसुरामरकटाक्षपुञ्जैरञ्जनधराधरमञ्जलमरविन्दाक्षमिव यतिकुञ्जरमिदं जगाद ॥

स्वामिन्नद्य दुरन्तसंसृतिजरद्घूर्णाविशीर्णां मतिं ।
किं चोदञ्चितकर्मवञ्चिततरां मुञ्चामि संचिन्तयन् ।
राजद्वारिजगर्वचर्वणचणं पादं चकोरो यथा ।
वाञ्छा चञ्चलचञ्चुरञ्चति तथा वाञ्छास्म्यहं चाञ्चितुम् ॥ ११ ॥
वर्यो योऽपरसूर्यसूर्यधिशिरोधार्याङ्घ्रिरर्योशिता ।
वेदव्यासवचः सुधारसझरीमाधुर्यधुर्यायते ।
शिष्योऽहं तव तादृशस्य भगवन् कारुण्यवारांनिधे ।
सेवायै स्पृहयामि रक्षतु भवान् त्र्यक्षापराक्षक्षणम् ॥ ११९ ॥
मोहादादाय मोहाकलितपरिचया श्री च या भावदात्री ।
वाचाटाटोपवाचा परहृदभिदा या भिदा निन्दितां ताम् ।
हित्वा तान्तस्निहित्वा पदयुगमधुना साधु नाथं प्रपन्नः ।
पायास्तस्मादपायाज्झटिति करुणया त्राणयाच्ञा परं माम् ॥ १२० ॥

इत्थं शतकृत्वः प्रणत्य पणायन्तं फणिमणिनिपुणं विश्वरूपमनुजिघृक्षुं भिक्षुवरा-ध्यक्षमुद्वीक्ष्य भारतीदमाचचक्षे ।

भगवन्, पुरा कदाचिन्मामकीना जननी सदनं समया समापतन्तं महान्तं कमपि योगीश्वरं दृष्ट्वा यथाविधिपूजां विधाय वसन्तीमुपकण्ठेन मां निर्दिश्याऽस्याः सुतायाः कीदृशी भाग्यावलिरिति नाथितवती । सोऽपि श्रमणीमणिरेवमभणीत् ॥

जातो विधाता भुवि मण्डनाख्यो । जायाऽस्य पुत्री तव सुन्दरीयम् ।
वाराशिकन्येव...रिमास्ता । वरीभरीति प्रमदं च पूर्णम् ॥ १२१ ॥
जातेन शङ्करशरीरमिवाततोऽयं । श्रीशङ्करेण विजितोरखिलं[१७] विमुञ्चन् ।
शिष्यो......ष्यति भिक्षुवेष– । मेषां च मोक्षमयतीति रहस्यमेतत् ॥ १२२ ॥

१७. विजितो ह्यखिलं ?



इत्याभाष्य ययौ योगिवन्दनीयः[१८] पुरा बुधैः ।
अलीकस्तस्य वाग्जालानालीकोऽपि विलोक्यते ॥ १२३ ॥
पतिस्तथाऽप्यर्धजितो ममाऽयं । पत्नी यतोऽहं न जिताऽद्य वर्ते ।
स्थाने न ते शिष्यमतो विधातुं । विधेहि वादं विवदामि सार्धम् ॥ १२४ ॥

तदनन्तरमेवमुदीर्णमाकर्ण्य स्त्रिया सह विवादकथनमसाम्प्रतमिति रोद्धारं यति-नेतारं गार्गीं निर्दिश्य विदुषी सा न्यरोत्सीत् ॥
ततः समस्तामरशस्तयोस्तयो– । र्बलाहकाध्मातनिबर्हणक्षमः ।
अजागरीद्वाङ्मनसेन दुर्ग्रहो । वादः पुनर्वेल्लितपूर्वपक्षकः ॥ १२५ ॥
यातेष्वथ त्रिचतुरेषु दिनेषु सभ्या –। जय्यः स नेति समविद्रुत साऽपि वाणी ।
संचिन्त्य बालयतिनं गुरुमाशु मेने । बन्धुं तदा स्मरकलाभिधरञ्जुनैव ॥ १२६ ॥
तदनन्तरं च––पप्रच्छ सङ्गतिवशान्मदिरेक्षणा सा ।

कोक्कोहतन्त्रकुशला यतिशेखरं तम् ।
स्मारीकला स्मरि(र)सितासितपक्षभेदात् ।
स्त्रीपुंसयोर्जगति कीदृगुदीरयेति ॥ १२७ ॥

अथ तदानीमाचार्यभोगीनः पद्मपादश्छात्रवर्यो मौनमुपेयिवांसं यतिवतंसं देशिकमा-श्लोक्य[१९] नारीवरीयसीमिदमभाषष्ट ॥

अयि वरवर्णिनि, अ(त) त्रभवत्या दुष्कलाविचारजिज्ञासा न युक्ता परिदृश्यते, तद्विरम विरमेति ॥ ततः साऽपि विजयेप्सया परिहारान्तरमुल्लिख्य कापथधिषणाया न व्यरंसीत् ॥

अथ कतिपयमासानवधीनाकलय्य तदीयनिलयादुच्चलितः सह शिष्यैर्भाष्यकारो नानावीथिमहीरुहच्छायशीतलतलं परिसरसरिसरन्मधुरमधुरमधुपझङ्काररराजितराजीव-निकरालं परःशतनिर्झर तापसजनभोगिनं शिरसा सुधांशुबिम्बं कि(की')लयन्त-माभोगेन धरां पायन्तं कमपि धराधरमधिरुह्य वारिजचरणमुखानित्थं व्याजहार ॥

उदयति तमःप्रचारस्तस्याऽभावो न जातु तत्काले ।
बोधयति सर्ववस्तुज्ञानमहो यत्स्वभावतो नृणाम् ॥ १२८ ॥
उशन्ति सर्वत्र जगन्ति पातुं दोषस्य मोहं करणं महान्तः ।
अतो विचारो मम दुष्कलायां दोषाय कल्पेत न जातु वत्साः ॥ १२९ ॥
तथापि कतिचिन्मूढाः कलिदोषवशादिह ।
अहंकारादिभूयिष्ठा जनिष्यन्तै महीतले ॥ १३० ॥

१८. योगी वन्दनीयः ?
१९. °लोक्य ?

ते महधमपरात्स्यन्ति न दूये तत्र किंचन ।
निन्दिक्ष्यन्ति परं मत्कांस्तेनैव दयते मनः ॥ १३१ ॥

वत्सास्ततः परतनुं निविशेऽद्य वेत्तुं । स्मारीकलामवत तावदिदं शरीरम् ।
यावन्मदागमनकालमिति ब्रुवाणः । कार्यान्तरं जिगमिषुः सुदरीमगात्सः ॥ १३२ ॥

तदा नृपालोऽमरुकाभिधानो । गतासुरासीत्सुकुमारमूर्तिः ।
करन्ध्रमार्गेण तदीयदेहं । विवेश सर्वज्ञगुरुर्महात्मा ॥१३३ ॥

तदनु सपदि शिष्या विस्मयाविष्टचित्ता– ।
स्तनुमतिरुचिराङ्गां...मध्ये निधाय ।
मणिमिव नितरां तां पालयन्तो महीध्रे ।
तुतु (तु) स्मरकल्पाः कन्दमूलादितृप्ताः ॥ १३४ ॥

सर्वज्ञस्ततो वियति जीववपुः प्रविश्य ।
पूर्वं पदाङ्गुलियुगं चलयांचकार ।
वत्सान्तरस्थधमनीमथ मञ्चमध्या–
दुन्मील्य चक्षुरुदतिष्ठदसौ महात्मा ॥ १३५ ॥

जीवन्तमुर्वीपतिमालिलाल्यं । स्त्रैणं च पौस्नं च तदा विलोक्य ।
आनन्दविष्फूर्तिपयोधिवीचौ । पन्नं निमग्नं किल पारवश्यात् ॥ १३६ ॥

राजत्युदग्रशयनीयतले सुराज्ञि– ।
हर्षाश्रुपूरसलिलागलमज्जनानाम् ।
स्त्रीणां तदा रुरुचिरे मुखमण्डलानि ।
प्रातर्जलोल्बणतटाक इवाम्बुजानि ॥ १३७ ॥

प्राज्ञैरप्यकुतोभयो नियमितप्राणैर्न लभ्योऽत्र यः ।
प्राप्यैनं तितरीषुणा रघुपतेः कारुण्यरूपं पुरम् ।
आरब्धे परमेश्वरेण सुधिया ग्रन्थे पयोवारिधौ ।
तार्तीयीकतरङ्गमङ्ग विबुधा वो मन्वतां मङ्गलम् ॥ १३८ ॥

॥इति श्रीकविकण्ठीरवेण परमेश्वरेण विरचिते आचार्यविजयाख्याने चम्पूकाव्ये तृतीयस्तरङ्गः ॥ हरिः ॐ ॥

॥ शुभमस्तु ॥

॥ चतुर्थस्तरङ्गः ॥

अव्यादव्ययविश्वनाथकृपया चिच्छेद योऽसन्मतं ।
तेने कन्दलदर्थसङ्गतिरसं कृष्णस्य हृद्यं च यः ।
त्राता श्रीघनकुम्भिकुम्भदलनव्यग्राहव पञ्चाननं ।
जेता मण्डनपण्डितस्य सकलं ज्ञाता समां शङ्करः ॥ १ ॥



अथ तदानीं प्रधानिनो विदितमन्त्ररोधसः पुरोधसोवचनेन विस्तारास्तरणं पिहित-स्कन्धदेशस्थितसृणिहस्तहस्तिपका....चूलिके निष्कम्पपुष्कलपरिष्काराविष्कृतपुष्करे-वाहित्यश्छुरितबन्धुरसिन्धुरे राजवाह्यसिन्धुरे समारूढं परिवृढं पौरैः परिवृतं मूर्तिमन्त-मिव नयनानन्दं साङ्गमिवानङ्गं साक्षात्संततमिव वसन्तं साकारमिव शृङ्गारं धरणी-रमणं कृताकृतपूर्वालङ्कृतिं पुरतोनटभ्रूकुटीकुटीरितनिटिलनटीजनविशङ्कटां कटितस्र-वन्मदवारिमदावलावलिं विटचेष्टासहवीटीरसघटितविलासिनीपटलाधररदनदीप्ति-पाटलितनानाविधपण्याभरणघृणिचकचकितविपणिसरणिं घोटकखुरखुद्दालदलितभूजृ-म्भितधूलीपालिभिरकालेऽपि दशदिशां सन्ध्यारागं दापयन्तीं गायकगणपाणिगृहीतवीणाशत-गीतिरणनबध(धि?)रितरोदसीं परितः कुसुमदवनादिसौरभसुरभितचिकुरनारीकरनिकरा-वकिरितभूरिलाजां शीतलजलतिमितराजमार्गां वैतालिककीलितनुतिबहुलां तूणीमिव रमणीयविविधविशिखामच्युतास्थानीमिवोद्धलशोभितां सभामिव पृथुकविप्रकृतिनिबरीसां देवकीमिवानकदुन्दुभिमुखजातशब्दरञ्जितां महिलामिव स्नेहपुरस्कृतसाधुकुन्तलां तृष्णा-कुलितामिव चारुतरवारिरोचितां वसुधालङ्कारधामग्रामामपि नवसुधालङ्कारधामग्रामां नगरीमभितः प्रदक्षिणं कारयामासुः । ततोऽवरोधने पद्मिनीजनोऽपि पद्मिनीवल्लभ इव चतुरं महाराजकुञ्जरमवाप ॥

ततो.......स्फीतयशाः पयोनिधिस्मरार्चनीयोऽमरुको महीपतिः ॥
अयं च तत्रार्त्तजनानुकम्पया तमाददात्रामदवोचदद्भुतम् १ अ ॥
तदानीं च सच्चिदानन्दरूपोऽयं शरीरान्तरसङ्गतः ।
ननाट राजा कामीव यथा कृष्णश्चिरंतनः ॥ २ ॥

विश्वंभराभरमयं नयधूर्वहस्य ।
विन्यस्य मूर्धनि महासचिवस्य भूक्षित् ।
स्त्रीविभ्रमाभ्रमवशंवदताभियोगी(ग) ।
स्फातिचकार मदनागमसारवेदी ॥ ३ ॥

तदानीं किल– अलकालिविलोलाक्षो लङ्काराजानुभूषितः ।
सुधर्मावननिष्णातः क्षमापालोऽपि भाति सः ॥ ४ ॥

नृशंसचक्रं विनिहत्य शस्यं । यशाः शशासावनिचक्रवालम् ।
निरीतिबाधस्य सरीसरीती । सनीतितां तत्परितोऽस्य देशः ॥ ५ ॥

सदा प्रतापार्यमरश्मितापा– । द्वलाहके वर्षति वार्यवार्यम् ।
यथाविधानं विषये तदीये । त्ववग्रहः कुम्भिषु जृम्भते स्म ॥ ६ ॥

विश्वेषु यज्ञनिरतेषु च वेदवित्सु । सर्वे सुरा अमृतमाशु जहुः कुदेवाः ।
तत्प्राग्रहीषुरिह चित्रमिदं किमेत– । च्चित्रं पुनस्तु सकला अमृताशिनो यत् ॥७ ॥

नित्योदयं द्वहुकरोऽथ वनीपकेभ्यो । दातुं यदैककरतो निरतस्तदैव ।
चिन्तामणिः सहचरो दृषतोऽधमायाः । कल्पद्रुमोऽपि कलिभूततरो बभूव ॥ ८ ॥

किंच—दन्तावलोभयकटीतटगाङ्गनिर्यं–। द्दुग्गन्धिदानमधुपानमदाभिभूतैः ।
इन्दिन्दिरैर्बहुवदा...णित्वं । सर्वस्य तस्य जघुषे किल वीरवीथौ ॥ ९ ॥

ततः— क्षोणीनाथो मनितमदनस्कारसारप्रकारो ।
रत्यां प्रीत्यां हरकृतवपुष्का...कां दधानः ।
वामाक्षीभिर्वलरिपुरिव स्फीतरागानुबन्धो ।
लावण्याम्भोनिधिमधिजरीजृम्भिताभिः स्मरे मे ॥ १० ॥

अथ कदाचिदमन्दानन्दमकरन्दचूषणमिलिन्दः क्रीडाविनोदशाली मन्मथ इव रतिप्रियः, इन्द्र इव सुधर्माश्रितः, अग्निरिव कृतस्पर्शनादरः, यम इव मित्रनन्दनः, निर्ऋतिरिवा पाशशरपारावरोन्मुखः वरुण इव...वायुरिव जवनहरिणोढः, धनद इवाऽलिकालिविनोदी, ईशान इव शूरसेवितः, पुनर्जीवनेन नवरसास्वादनरतोऽपि कामुकतयाऽपि तादृशधीमानमरुकमहीपतिरनन्यसुलभलावण्यमधुराङ्गीभी रथ्यादिरिव माणवकविभूषिताभिर्भ्रमरीभिरिवाऽन्दोलितगुच्छाभिः, गगनवीथिरिव चलाचलनक्षत्रमालाभिर्मालाभिरिवोपचितामोदवीचिभिः वीचिभिरिवोच्चलितकङ्कणाभिः, करिणिभिरिव लोलकण्ठिकाभिः, रजनीभिरिव शुभ्रांशुकभाताभिः सरणिभिरिव...कोपगूढलक्ष्मणालसपदाभिः, सतीभिरिवामलयजनयुक्ताभिः, वानरसेनाभिरिव साङ्गदाभिः, वरवर्णिनीविच्छुरिताऽपि वरवर्णिनीभिः समन्वितः वकुलसरसवञ्जुलमञ्जुललिकुचचम्पककिंशुकपनसफलपूरगुडपुष्पपाटलकुटजकुरण्टककुरबकमरुवककरवीरकपीतनतापिच्छशिरीषकदम्बमन्दारसुन्दरं सुरलोकमिव देव(व)ल्लभसमुल्लसन्तं पत्तनमिव बहुजातिसंबाधं कामिनमिव कान्तान्तरसरसं पांसुलाजनमिव पल्लवाञ्चितरसालसमुदायमितं शुकपिकबककाककेकिचटकटिट्टिभककलरवखञ्जरीटकूजितमधुरकुलायं रामणीयकनिलायमाराममव्राजीत् ।

शिशिरसमीरकुमारचलत्स्तबकगलत्सुमरेण सितम् ।
उपवनमेत्य नृपः सुमुखीकुलमवलोक्य जगाद तदा ॥ ११ ॥

अयि तपनीयवपुषः कमनीयनयनाः पश्यत रमणीयमारामम् ॥ यतः—

इयं कुरवपादपैर्दरदलद्गलत्कन्दलैः ।
पलाशतरुभिश्च सन्मुकुलजालशोणान्तरै : ।
वसन्तपतिसङ्गमश्चुरितकुङ्कुमौघच्छटा –।
बहिस्फुरितरागभागिव चकास्ति पृथ्वी भृशम् ॥ १२ ॥

किंच— लोभादुपर्युपरि कूजदलिव्रजत्वा– ।
त्किं च प्रभञ्जनरयेन चलाचलत्वात् ।
पीतो रसो मधुकरैरति रोदितीव ।
स्रस्तं हठात्कुसुमवृन्दमिवाविभाति ॥ १३ ॥

खादन्तो मृदुचूतपल्लवलयं कान्तामुखास्वादितं ।
पाठीनां कविभूतिवाचकविदः कूजन्ति पुंस्कोकिलाः ।
वामालिङ्गनवाञ्छया सचकितव्यग्राकुलानन्दित–।
स्वान्ताध्वन्यजनश्रवःसु नितरा नाराचवेधाकरम् ॥ १४ ॥



ततः कामपि तरुणामालोक्य—

रसालविटपान्तरे नटमुदारदारादरं ।
विहाय परकोकिलामनुसरन्नयं क्रीडितुम् ।
सकोपभरमातुरत्रसितलोचनाभ्यां छदैः ।
स्मरज्वरहरांहर्ति रमणिताभ्यां हृतः ॥ १५ ॥

परभृतस्य शिशुर्जगदर्पितं । परभृतस्य...तः परसङ्गतम् ।
परलिहात्किसलं नमतीव मा । प्रहरमामिति सुन्दरि दृश्यते ॥१६ ॥

...नन्तरमित्यनया सह संलापपरमितावरमीर्ष्याप(क्ष्मो)ष्मलेनचक्षुषः कोणवीक्षणेन प्रवेणीसम्प्रदानेन च निघ्नन्ती नीरस...पर्यष्वजत ॥ ततस्तदीयांसोपरिरचितपरिचयैककरवारिजोपरकरेण हृदयनिलयामसूयां रिमार्ष्टुमिवोत्करटिशिरस्तटस्पर्धिनीचन्दनचर्चिते पयोधरे परिमर्शयन् स्पर्शनं दर्शयन्निदमुदगारीत् ॥

त्वङ्गन् मञ्जुलमञ्जुरीनिचयसंगुञ्जन्मिलिन्दच्छटा ।
रिङ्खत्फुल्लदगण्यपुष्पविगलद्धारे मधूलीझरे ।
उद्यत्तुङ्गतरङ्गरिङ्खणकणग्राही जडो मन्दरो ।
वाति स्फीतपटीरसौरभझरीभारी पुरो मारुतः ॥ १७ ॥

किं धुनोति गिरिमल्लिकां धवति चूतशाखां पुन–
र्विधूनयति पाटलीं कुरवकं विधूनोति च ।
धुनाति बहुचम्पकं परिलुनाति तत्कन्दलीं ।
गृणाति मदनार्भटीं पवनडिम्भरंहः प्रिये ॥ १८ ॥

अपि च–– मन्दागमो गन्धवहो मदान्धितः ।
पान्थान्निरुन्धन् कथमेष बाधते ।
आविस्मृत तस्य कुतो दया भवेत् ।
यो मातरिश्वेति विगीयते बुधैः ॥ १९ ॥

इतीरयित्वा संचितकाञ्चीलता(म?)किंचनां कांचन काञ्चनाङ्गीं कुसुमापचिकीर्षया शाखाभिमुखमुखीं सुमुखीं परिषिष्वङ्क्षयेदमाचख्यौ । अयि वामलोचने–

मुखामोदास्वादे लिप्सया रप्स्यमान ।
स्यदा स्रप्स्यन्तीयं चञ्चरीकावली त्वाम् ।
जहाहीप्सां मारप्रेरितां फुल्लमाला– ।
मुदूढां दास्येऽहं तुभ्यमायाहि सुभ्रु ॥ २० ॥

इयं किल— मुष्णाति पुष्पमधुभृङ्गततिस्तदेव ।
मृन्दाति पादहतिभिः खलवत्परागैः ।
पुष्णाति वर्ष्म च गृणाति मनोहरं च ।
क्षुभ्नाति पान्थहृदयं सदयं तृणाति ॥ २१ ॥

किंच— प्रसूनसर्पन्मधुचूषणेप्सया ।पतन् धरायां पुनरुत्पतन् दिवि ।
पुञ्जीभवन्निन्दति धूलिधूसरः । पुष्पंधयः कन्तुकविभ्रमाभ्रमीत् ॥२२॥

इत्युदीर(य)ञ्चेवोपसृत्य समीपं विकृष्य वेणीदामानं चेलाञ्चले च बाहुदण्डाभ्यां कण्ठमालिलिङ्ग मकरलिङ्गसुन्दरः ।

एवं स धरणीनाथो रमणीभिः समं वने ।
जम्भारिरिव रम्भादिरम्भोरूभिः स्म कूर्दते ॥ २३ ॥

तदानीं किल– खेलन्मुञ्जु शकुन्तपुञ्जनिबिडे हृद्युद्यानमध्ये मद–।
–क्षीबानेकपचंक्रमक्रमसमन्यस्यत्पदा कामिनी ।
काचित्काचिदपि क्ष्माधिपतये पत्ये ह्नुते श्लाघते ।
वार्तां यच्छति तिष्ठते स्पृहयति क्रुध्यत्यपि प्राच्छंति ॥ २४ ॥

तदनु चारामवीथीमभितो विहृत्य नित्याधिपत्ययोग्येन वसन्तसमयभृत्यकरधार्यमाणेन वितताववनतविटपविलम्बमानपृथुलस्तबकाविरलदलितधवलबहुलसुरभिलसाममयेनाऽऽतपत्रेण मलयनिलयानिलबालोच्चलिते नाऽग्रतः पुञ्जीभूतपल्लवफुल्लमल्लिकावल्लीतल्लजविकारेण चामरेण च परिहृत कल्पानल्पपरिक्रमश्रमो वसुमतीपतिर्जलक्रीडाभिलाषयाधिकप्रमदाभिः प्रमदाभिः सह पचेलिमगलितसुमनोवितानतया नारीशरीरेण वा गृहीतकार्कश्येन नामन्दमन्दं कासारतीरमुपससार ॥ तदानीं च—

डयितुमलसगामी राजहंसव्रजस्तं ।
घनकुचजघनानां मण्डलं मन्दगत्या ।
निरुपममुपयान्तं साध्वसार्तो विलोक्य ।
क्षणमतिमुदमाप्नोद्दुःखमाप्नोत्क्षणं च ॥ २५ ॥
विलासिनीमानसमोहिलीलापरायणं तं प्रति संमुखीनाः ।
काकुच्छलात्स्वागतमुद्गृणन्तः श्वेतच्छदाः साप्तपदीनमायन् ॥ २६ ॥

ततश्च नृपवाटीतिलको विटपिपटलजटिलं विकटतटाकतटनिकटमाटीक्य चेटीकटानीतं पटं शोणगुणानणीयसं नितम्बिनिकुरम्बेन सहाऽग्रहीत् ॥

कुसुम्भरुचिबन्धूरं वासो धृत्वा परंतपः ।
स स्मारागममर्मज्ञः सस्मारात्मतनुं तदा ॥ २७ ॥
प्रत्यूषहर्षनिभृतामितकोकराग– । विस्फूर्तिपिञ्चरितपूर्वदिगङ्गनानाम् ।
सन्ध्याभिधं कुलमिव व्यरुचत्तदानीं। स्त्रैणं शृतप्रथिमरक्तिमवस्त्ररम्यम् ॥ २८ ॥
कासारेऽथ रिरंसया युवतिमिस्ताभिः पुरैकं पदं ।
विन्यस्यापरमुत्थितं मणिमयात्सोपानतोऽभूद्यदा ।
उच्छूनस्तनभारतः परतनावाकुञ्चितायां तदा ।
पद्माकूलचलच्चलज्जलतलाऽऽपेदे जवादद्भुतम् ॥ २९ ॥



नितम्बिनीभिश्चरणानि किंचित् । क्षिप्तानि वेगाद्युगपत्तदानीम् ।
व्रीडेन नूनं चलजीवनत्वा– । ज्जग्मुर्दशां कामपि पङ्कजानि ॥३० ॥
झङ्कारिभ्रमरीपरःशतवृता भृङ्गा कुरङ्गीदृशा– ।
–माशामात्रविसृत्वरा त्वरतया विश्वासमा...समम् ।
कल्पाकप(ल्प?)कसूनकल्पसुरभिं शीघ्रेण जिघ्रासवः ।
पुञ्जीभूय पुरः कटाक्षपटलीसाहाय्यकं पेदिरे ॥ ३१ ॥

ततश्च कटिद्वयस्नपयसि पुरोऽवतीर्णेनाऽर्णवमेखलापतिना रसिकसाहसिकेन तेन क्षुभितचेतना ललामलुभिताः ॥

भीत्या चञ्चद्वालमीने जलेऽमू । र्बालाः काश्चिज्जानुदघ्नेऽवतेरुः ।
काश्चित्तर्षाकर्षणेनोरुमात्रे । कृष्टा हर्षा[1] नाभिदघ्ने च काश्चित् ॥ ३२ ॥
तदानीं च— उद्यन्मरालयुवतीगतिसौकुमार्या ।
कोकस्तनी मधुलिडारवनर्मवार्ता ।
पद्मानना शफरचञ्चललोचनाढ्या ।
भाति स्म तेन सरसी रमणीव रक्ता ॥ ३३ ॥
अथ क्षोणीरमणस्तरुणीरिदमभणीत्—
कान्तावचोविजितकोकिलकूजितारवो । वक्त्राणि मोषितसुधाकरवैभवानि ।
आलक्ष्य हन्त हृदये दधतेऽम्बुजानि। शङ्काकलङ्कमधुना मधुपच्छलेन ॥३४॥
खेटीनिभाः सुरभिलानि मुखानि पश्य– । द्वेयानि पङ्कजवनानि विमृश्य पादैः ।
खेटीनिभाः सुरभिलानि मुखानि पश्य– । द्वेयानि पङ्कजवनानि विमृश्य पादैः।
हत्वा गुरुं कृषिमिषात्पुरतो विनिन्द–। दभ्येति वंभरकुलं किल पश्यैतत् ॥ ३५ ॥
उपरि मधुकरावुत्थितायां तमिस्त्र –।
प्रसरसमयमत्या संकुचन्त्यम्बुजानि ।
इयमपि मुकुलानि व्याकुचन्तीति मिथ्या ।
मतिवशमुपयाता संपतत्यत्र लोभात् ॥ ३६ ॥
भुनक्ति कलिकामनो न विमुनक्ति वामाध्वनो ।
रुणद्धि परपक्षिणो भणति जातकर्णोत्सवम् ।
तृणत्ति करहाटकं स्फुरति पद्मवासाश्रयम् ।
यथामिधमयं पुरश्चरति धार्तराष्ट्रान्वयः ॥ ३७ ॥
इत्याभाष्य झषध्वजप्रतिकृतिर्योषाकुलं भूषयन् ।
विक्षिप्याऽञ्जलिना मुखेन सलिलं निष्ठीव्य तासां मुखे ।
एकेनाऽम्बरमाचकर्ष कबरीभारं करेण त्वता ।
निर्मज्जन् चरणं चकर्ष मधुरामूरुस्थलीमामृशत् ॥ ३८ ॥

१. हर्षात्? ।

नीवीं विलोक्य गलितामधु[1a] काचिदर्या ।
कान्तेन कुञ्चितमुखी ह्रियमेत्य नेत्रम् ।
उन्मीलनादचकलद्विरतं तुलाया ।
दूरां गतिं गतवती युवतीसमाजे ॥ ३९ ॥

ततः— पुनर्वनक्रीडननिवृतास्ता क्षौमानि सौस्नातिकतामितानि ।
समर्मरध्वानतया दधाना नीहारशीता न दधुश्च हारान् ॥ ४० ॥

ततश्च—क्षितितलऋभुक्ष।दिव्याप्रपदीनदुकूलशोभितः क्रीडापराधीनबहुलतरलकलकण्ठकलकलध्वानमध्वानमाक्रम्य गुच्छन् कर्मसाक्षिमण्डलमुद्वीक्ष्य समक्षवलितपक्ष्मलाक्षीं वीक्षमाणः सविलक्षमिदमाचचक्षे ॥

अद्यायं चिरविप्रयोगकलुषो लोलाग...न्तीरपि ।
लिप्तोद्गन्धिपटीरपङ्किललसद्वक्षःस्थलोऽस्ताचलम् ।
धावं धावमुपागतः करशतैः सान्द्रं समालिङ्गितुं ।
रागी कर्षति वारुणीं दिशमिमां कौसुम्भचेलाञ्चले ॥ ४१ ॥

अस्ताद्रिमस्तकपरिष्कृतपद्मराग–। संदोहदिव्यतिपलीकबलीकृतोऽस्रः ।
कश्मीरजन्मकलनां कुरुते प्रतीची । कान्ताकपोलयुगले कमनोंऽशुमाली ॥४२ ॥
कोपाविलेक्षणविदन्तरदन्तकुन्त– । संघटनाद्विसृमरासृगपप्रसारैः ।
शोणां तनु प्रसमरन्निव लक्ष्यतेऽयं ।
संङ्गेन कुङ्कुमवतीं दयितः प्रतीच्या ॥ ४३ ॥ (सविता)

इति वदमानोऽमरुकधराधिभूरक्षणामासेचनकाः सौविदल्लवागङ्गाकाः शिबिकाः समारुह्य प्रतिष्ठमानेष्वन्तःपुरमन्तःपुरेषु तादात्विकं तरणिमिव रमणीयरश्मि सरोजमिव चलच्चारुकेसरं कृपाणमिव धारादुराराध्यं कल्याणपल्याणसमुल्लसितपृष्ठभागं जवजिताशुगं तुरगं समारोहन् शृङ्गाटवीथौ प्रतस्थे ॥

तत्र विचित्रसुवर्णचितभ्रमिवेत्रलता– ।
संचितकञ्चुकिवञ्चनयाञ्चितसंचरणे ।
वल्गितवल्लभबर्हिकपल्यतलोल्लसितः ।
सस्वरभास्वरगायकगानरतो मुमुदे ॥ ४४ ॥

घोटजघाटिजघट्टनपाटितभूमितला– ।
दग्रविसृत्वरधूलिकलापभयादिव भानोः ।
अस्तमहीध्रसुकुण्डलमण्डलमन्तरितं ।
सोऽपि तमिस्रभयादिव वेश्म विवेश निजम् ॥ ४५ ॥

ततः सहस्रपुरा पञ्चः पतनं पश्चिमाम्बुधौ ।
वारुणीसेवया को वा पतितो न भवेद्भुवि ॥ ४६ ॥

तमसाभिषवं लब्धाप्युदितप्रीणानतारको लोकः ।
न मलिनं भावं केवलमायाद्दृष्टेश्च पाटवाभावम् ॥ ४७ ॥

नेदं तमः किन्तु कलिन्दजाया गवेषयन्त्याः पितरं द्युमार्गे ।
किं कान्तिपूरोऽभ्रधुनीगतानां नीलोत्पलानामिति वाऽद्य शङ्का ॥ ४८ ॥

१a. मथ? ।



रङ्गे क्षितौ स्मरनटेन्दुगभस्तिमाला ।
लासिक्युदग्रमहिमा परिवत्स्यतीति ।
आराद्विभावरिकरेण धृतान्धकार– ।
रेखापुरो घनतिरस्करिणीति शङ्के ॥ ४९ ॥

अथ तदानीमुदयमानं मदनविमानमभिकाभिमानलाविनं स्तम्बेरमगमनवामा–[2] ...नशोभावहं चकोरस्तोमानन्दप्रियंभावुकं जगदन्धकरणतिमिरमानापहरणजागरूकं कमपि मण्डलमालोकमानोऽखिलावनीपाकशासनो विलासिनीवरीयसीं महिषीं साकूतमिदमभाषत ॥

रम्भोरु पीवरकुचे मधुराधरेऽद्य ।
पश्यातुरः कुमुदबन्धुरहार्यहर्म्ये ।
एणाङ्कदिग्धमृगनाभिहृदन्तरोऽयं ।
प्राचीदिशो वदनमास्वदतेऽतिरक्तः ॥ ५० ॥

विधुर्वितन्वन् कुसुमेषु लीलां । किंचिद्विदूरीकृतरक्तवस्त्रे ।
ऐन्द्रीवरोत्सङ्गतले शयानो । विश्रान्तिमापन्नतयेव भाति ॥ ५१ ॥
प्रिये पुनः शोभनवक्त्रबिम्बं । तवावलोक्याधिकलज्जमानम् ।
मनोभवश्चन्द्रिकया गुणेन । बद्धवा शशाङ्कं कृषतीति शङ्के ॥ ५२ ॥

सानन्दोन्मेषमिन्दीवरप्रेमावतरणकरणं प्रति—

इन्दो हन्त विमुच्यसे सुरवरैः क्षीणो भवानित्यरं ।
सा पद्मिन्यपि गौरतल्पिक इति व्याख्याति दत्तार्गलम् ।
ध्वान्तौघोऽपि निलीनते त्वदधुनाऽप्यापद्य तारापथं ।
भाते निस्त्रपता निरङ्कुशगतिस्ते क्वाऽपि किं दृश्यते ॥५३ ॥

तटाकाभाकाशे घृणधवलानालोपरिचलाः ।
कनत्ताराकारा मुकुलनिकराभान्ति मधुराः ।
अयं निस्तन्द्राब्जं भवति मकरन्दामृतधरः ।
क लङ्कं शङ्केऽहं भ्रमर इति तस्यान्तरगतम् ॥ ५४ ॥

तदनन्तरं च—

माणिक्यवैडूर्यकपुष्यरागगोमेधगारुत्मकचन्द्रकान्तैः ।
आकल्पितैडूककवाटनासा प्रघाणसोपान...ज्ये ॥ ५५ ॥
नितम्बिनीबिम्बसमानचित्रे क्रीडाशुकोड्डीननिरोधिनीडे ।
सुगन्धिभिश्चम्पकमल्लिजातीमतल्लिकाभिः सुरभौ विशाले ॥ ५६ ॥
श्रीखण्डखण्डादिमधूपद(ग)न्धैर्वातायनायात्तसुशीतला ते ।
वितानकान्तेन...नगीतरुतावृते सौधवरे निषण्णः ॥ ५७ ॥

२. वामा(न?)नशोभावहं? ।

चञ्चद्भ्रुमन्दस्मितपूरिताधरं । तियर्क्पतच्चञ्चलमुग्धवीक्षणम् ।
विलासिनीभिः सविलासिनीभि– । दंरोदरे कुर्दतपातिपाशम् ॥ ५८ ॥

अथ तदानीमुदयमानं मदनविमानमभिकाभिमाललाविनं मत्तगमनवामाननशोभावहं चकोरस्तोमानन्दकारणं जगदन्धंकरणतिमिरमानद्रोहिणं पूर्वशिखरिण(र)श्मिर...वर्तमानं कमपि मण्डलमवलोक्याऽवनीपाकशासनो लोकातिशायिसौन्दर्यशालिन्या कामिन्या महिष्या सहाऽऽसीनः सानदमिदमवादीत् ॥

इन्दो हन्त विमुच्यसे सुरवरैः...क्षणो[3] भवानित्यलं ।
सा पद्मिन्यपि गौरतल्पग इति व्याख्याति दत्तार्गला ।
ध्वान्तौघोऽपि निलीयते त्वदधुनाऽप्यापद्य तारापथं ।
......[4]निस्त्रपतां निरङ्कुशगतिस्ते क्वापि नालोक्यते ॥ ५९ ॥
तटाकाभाकाशे रुचिरवृणिनालोपरिचलाः ।
कनत्ताराकारामुकुलनिकरा भान्ति मधुराः ।
अयं निस्तन्द्राब्जं भवति मकरन्दामृतधरः ।
कलङ्कं शङ्केऽहं भ्रमर इति तस्याऽन्तरगतम् ॥ ६० ॥

रम्भोरु पीवरकुचे मधुराधरेऽद्य । पश्याऽऽतुरः कुमुदबन्धुरहार्यहर्म्ये ।
एणाङ्कदग्धमृगनाभिहृदन्तरोऽयं । प्राचीदिशो वदनमास्वदतेऽतिरिक्तः ॥ ६१ ॥
विधुर्वितन्वन् कुसुमेषु लीलां । किंचिद्विदूरीकृतरक्तवस्त्रे ।
ऐन्द्रीवरोत्सङ्गतले शयानो । विश्रान्तिमापन्नतयेव भाति ॥ ६२ ॥
प्रिये तवानङ्कमुखेन्दुबिम्बं । विलोक्य लज्जामगमच्छशाङ्कः ।
सखीयता शम्बरवैरिणाऽयं । विकृष्यते तेन करे गृहीत्वा ॥ ६३ ॥
ध्वान्तप्रत्यर्थिभावं वहति कुचभरश्चन्द्रबिम्बप्रदीपं ।
वक्त्राम्भोजं तवेदं सुनयनयुगलं नील[5]...म्भोजरम्यम् ।
सौन्दर्यं दन्तपङ्क्तेः प्रभवति नतरां मल्लिकाकुड्मलानां ।
कान्ते केनाऽसि सृष्टा युवजनमनसः कर्षणे तर्षयाऽद्य ॥ ६४ ॥

ताटङ्कडम्बरविडम्बितमित्रबिम्बे ।
यूनां मनोहरमधूल्यधरोष्ठबिम्बे ।
आरोपिताञ्जनदृक्तव वीक्षणास्ते ।
खञ्जना...नुवने व्यथया चरन्ति ॥ ६५ ॥

३. क्षीणो ? ।
४. भाते । – See st. 58, last line.
५. नील(म ?)म्भो ? ।



फलान्तरे कुटिलकुन्तलशोभमाने ।
कस्तूरिकां विदधीं[6] चलगोलकाक्षीम् ।
त्वं वेत्ति कापि कुसुमेषु लुभन्मिलिन्दो ।
यातुं न यातुमपि वीक्ष्य मनो दधाति ॥ ६६ ॥
मुग्धे पक्ष्मललोचने तव कलानाथालिके वक्त्रितः ।
भ्रूविक्षेपणचातुरी युवगजेष्वालानकल्पायते ।
नासाचम्पकलम्बिकर्बुरकनत्ताराभताराद्युति ।
व्यालीढोष्ठपुटे वटी भवति गीर्यन्ता स्मरो जायते ॥ ६७ ॥

इति सरसवचनेन विप्रलम्भयन् विश्वंभराजम्भभेदविकस्वरं तात्कालिककलानिधिमिव भांस्वरं मुखमण्डलमवनमयन्त्य।[7] तस्या वरारोहाया[7] स्तनतटादपनीय कञ्चुलीं आलिप्य यक्षकर्दममुत्क्षिप्य पटवासकं विलिख्य मकरिकामालिङ्ग्याङ्गहारमास्वाद्याऽधरबिम्बीफलमाघ्राय चिकुरसौरभधोरणीमाचुम्ब्य तालुमण्डलमादाय वीटीरसमारभ्य चुम्बनभेदमुघ्दाटय बन्धविशेषं क्रमेणाऽनङ्गमुकुरयामास ॥

चकोराक्षीं मन्दस्मितशशिमुखां मुग्धवचनां ।
लसद्वाहाकुलीं कषकनककुम्भस्तनयुगाम् ।
परिष्वज्याभीकः पुलकजघनालम्बिकदली– ।
समानोरुं भीरुं लुलितकबरीं माद्यति पुरां ॥ ६८ ॥
स्मारं...........कलाविशेषं स राजन्यः
अधरसुधामाधुर्यं पायंपायं तुतोष कमलदृशः ॥६९ ॥
तुहिनकलिकास्वेदां विलोलकचोच्चयां ।
स्मरधनु...लभ्रूविक्षेपां चलाचलकुण्डलाम् ।
उदितकलसीत्कारां नटत्कुचकुड्मला– ।
मुपरिसुरतक्रीडां कामी तयानुबभूव सः ॥ ७० ॥
मुकुरनिभकपोलालिप्तपत्राङ्कुराढ्यां ।
द्व्यणुकसदृशमध्यां चन्दनालिप्तगात्राम् ।
कनककमलकोशस्निग्धवक्षोजयुग्मां ।
रहसि रहसि धन्यः क्रीडयामास कामी ॥७१ ॥
इत्थं स्त्रीललितातुरो विलसितः शृङ्गारशृङ्गाटके ।
व्यस्मार्षीत्स्वकृतावधेरमरुकः स्त्रीणां हि भाग्योदयात् ।
विष्वद्र्यङ्ङमृगयारसेन मृगयुर्व्यापारनिर्घ्रैभंटै ।
निर्धुन्वन् परिपन्थिनः स्मरकलागारे जजागार सः ॥ ७२ ॥

६. विदधतीं ? ।
७. °यन्त्याः & °हायाः ? ।

अथ कदाचिदाचार्यवर्यशरीररक्षिणः फलीनरसालपनसवारणाबुसादिसमुल्लासिनीं माधवनीमिवाभिलषितफलदायिनीं शैखरीणीवनीमापद्य तृप्यन्तोऽन्तेवासिनो देशिकनिदेशसमयमतीतं मन्यमाना अन्योन्यमिति विचिन्तयामासुः ॥

गुरुभिरवध्रिरुक्तो मासमात्रं व्यतीतः ।
स च पुनरतियाताः पञ्चषा वासराश्च ।
निजकरणमुपेत्य क्षिप्रमस्मात्कथं नो ।
भवति हृदि सनाथीकर्तुमद्याऽनुकम्पा ॥ ७३ ॥
अभविष्यद्यदि वेदिता क्षितौ कथयेदन्यशरीरवर्तिनः ।
तदिदं हा गगनारविन्दतीत्यलसान् कः परिपालयेदिह ॥ ७४ ॥

...पुण्ड्रकवितुन्नकं काञ्चिनीभिरञ्चितं भरतमिव शृङ्गिबेरबेरं उदन्वन्तमिव वाडववन्तं रङ्गनाथमिव पुंनागकृतमालालङ्कृतं, श्रीशैलमिव मल्लिकार्जुनसेवितं, कुलपालिकाकुलमिवोत्तमावमानताम्रशूरमिव नारिकेलिक्षमास्पदं, आस्थानमिव बहुसंख्यावत्पूगं बाल्यावस्थावस्थायि स्त्रैणमिव नवलिकुचधुरंधरं प्रायशः शालिविलसितममरूकशासनेनामरुकतया भ्रमरकटन्यायप्रथमावतारभूमिं प्रतिमासवर्षेण समृर्ध्रुवन्तं[7a] कमपि देशमुपगत्य विचिन्त्य महापुरुषपालितं सम्यग्विचारयांचकार ॥

ततः— तत्रत्यादभिगत्य पत्युरवनेर्वृत्तं निवृत्ताधयो ।
दूरेत्यावयमित्युपेत्य सरणिं गीत्या गिरन्तो गिरम् ।
तां जग्मुर्नगरीं यदीयसदनं न्युप्तैन्दैवग्रावणोर्[8] ।
निर्यद्भिः सलिलैर्भजन्ति कलमाः कश्मीरदेशीयताम् ॥ ७५ ॥
ततः— ययातिवैन्यसंमान्यं राजन्यं गानलालसम् ।
नियतं ते यतन्ते स्म द्रष्टुः[9] प्रश्रयमाश्रितः ॥ ७६ ॥

अथैकस्मिन्नवसरे सौविदल्लमल्लजनभ्रूवल्लीविक्षेपणाभङ्गुरभङ्गीविलोकनमात्रस्तब्धगतागतनानाविधोपहारं प्रतिहरं राजकीयप्रेममहिम्ना समतीत्यानर्घमाणिक्यभूषणभूषितगाणिक्यरचितसरल्यलङ्कारे संगीत इव सौराष्ट्रश्रीरागास्पदे रतिरहस्य इव कलाविशेषचर्चासमर्चिते सदसि सविनोदं वृत्तिना पिच्छिलकुञ्जितकरञ्चितचञ्चलमणिधकधकितकाञ्चनकङ्कणसंचयघर्षणजृम्भितझंकृतिडम्भतः पङ्कजचरणमुखोपचंक्रमणकर्णेजपवर्णनीयवरवर्णिनीप्रकम्पितचामरेण तुलितानीचामरेण भद्रासनमधिरूढेन परिवृढेन नयनभाषया निर्दिश्यमाने दृश्यासने समुपविश्य नारदादपि विशारदः, तुम्बुरोरपि मतिगुरुः सङ्गपरिच्छेदेन पद्मपादप्रबलगन्धर्वानपि वृथागर्वान्धान् पुष्पंधयानपि वाचंयमत्वमुर्ष्टिधयान् वनप्रियानपि प्राप्तविप्रियान् वितन्वानो मूर्च्छनारागेण शारिकाभिरपि श्रोतव्यमित्यगासीत् ॥

७a.–द्धिम° ?
८. °न्दव ? ।
९. द्रष्टुं ? ।



अङ्ग बहुतुङ्गतरुलिङ्गगिरिशृङ्गे ।
भृङ्ग तव सङ्गजुषि मङ्गलकृदङ्गे ।
न्यायमपहाय तदपायहतकाये ।
पञ्चशरमञ्चयसि संचरसि मुञ्च ॥ ७७ ॥
हे हंस मानसमवाप्य तवाब्जषण्डं ।
सन्नंसनाथमवितन्यवसन्निहैव ।
एष्यामि तूर्णमहमत्र पुनः शुचाल– ।
मित्यागतः स कथमद्य विलम्बसे त्वम् ॥७८॥
निस्तमसि नीरजसि निर्गलितसत्त्वे ।
चेतसि विवेकजुषि भेदमतिशून्ये ।
निर्वचनमानसपदादिगमितं य– ।
तत्त्वमसि तत्त्वमसि तत्त्वमसि तत्त्वम् ॥ ७९ ॥

इत्यादिप्रकटितमर्थमुपश्रुत्य विज्ञातस्वरूपी विज्ञायाऽवधिमतीतमाकारयितुं सनन्दनं च सपदि भगवत्पादो मूर्च्छां नाटयन् सकलभोगायतनं संहननं सभासज्जननयनसलिलेन साकं पातयामास ॥ ततस्तत्क्षणमेव—

नृपतिमखिलहृद्यं मूर्च्छितं तं तदानीं ।
निशमयदतिवेलं रोदिति स्माऽतितप्तम् ।
न करमकरवं किं पापमेवंविधार्तेः[10] ।
प्रदमिति कथनीयः किं नृपस्त्री...राधः ॥ ८० ॥

अथ मन्त्रिणः सुरलोकान्नहुषमिव सिन्हासनात्पतितं नरपतिमवलोक्य हन्त हन्त तवाऽविश्वासोऽपि गलितः किं...विश्वासोऽपि गलितः किमित्याकुलास्तत्कालोचितमतानिषुः ॥ तस्मिन् समये —

अमरुकसचिवानामाज्ञया किंकरास्ते ।
निखिलभुवनभागं सत्वरं संचरन्तः ।
गुरुवपुरपजीवं मन्यमाना हठात्त– ।
त्कटकटसदिधक्षा न्यक्षिपन् साग्निचित्याम् ॥ ८१ ॥
तदानीमुल्लोलज्वलदनलकीलाविलसितं ।
शिखाघट्टत्रुटच्चटचटरटद्वेणुमटलम् ।
पुरो धूमस्तोमं घनमिव निशाम्यामितमुदा ।
स्फुरच्छम्पाकम्पं विपिनशिखिनस्ताण्डमगुः ॥ ८२ ॥
तदानीम्–– अन्यादृशप्राभवयोग्यदेहाद्दन्दह्यमानां स। तनुं स्वकीयाम् ।
प्राविक्षदस्तौष्ट नृसिंहमाद्यं तेनापवेधो द्युतदीशदेश्यः ॥ ८३ ॥

१०. °धार्ति° ?

नैदाघभास्वद्रुचिनिर्विशेषत्विषं तदर्षं विषयं दृशोस्तम् ।
ते राजकीया भयमाप्नुवन्तो नत्वा स्तुवन्तो भृशमाशु जग्मुः ॥ ८४ ॥

तदनु स परमहंसावतंसः सरोजाङ्घ्रिमुख्यैर्निजछात्रसंघैः समेतः रविरथतुरगविश्रान्ति विश्राणनस्थूललक्षात्सलक्षोपलक्षोच्चकूटात्कटकनिकटनिषीदत्तपस्विप्रपञ्चान्महीध्राद-वारुह्य वाणीपदाम्भोरुहविगलितरजः पात्रमुद्दामविद्यानिधेर्मण्डनस्याऽलयं प्रत्ययासीत्

प्राज्ञैरप्यकुतोभयो नियमितप्राणैर्न लभ्योऽत्र यः ।
प्राप्यैनं तितरीषुणा रघुपतेः कारुण्यरूपं पुरम् ।
आरब्धे परमेश्वरेण सुधिया ग्रन्थे पयोवारिग्नौ ।
वर्यं भूर्यकदर्यकार्यमहितं कुर्वन्तरङ्गं स्तुत ॥ ८५ ॥

॥इति श्रीकविकण्ठीरवेण परमेश्वरेण विरचिते आचार्यविजयाख्याने चम्पूकाव्ये चतुर्थस्तरङ्गः ॥

॥ **अथ पञ्चमस्तरङ्गः** ॥ (अ)

**49b**

वन्देमहि भगवन्तं दुरहंकार्यैः सुदुष्करो येन ।
प्रारम्भगृहप्रवेशको लीलामात्रादकारितं देवम् ॥ १ ॥
वन्देमहि भगवन्तं दुरहंकारदुर्लभं केल्या । (यस्मिन् )
वाणीविजित्वरत्वं विसृत्वरं सत्वरं केल्या ॥ २ ॥

(ग्रन्थपातः)

**(50a & 50b gap)**

**(51a)**

वाचोयुक्तिविकल्पितमतिव्यत्यस्तराद्धान्तिकं ।
ध्यायंध्यायमितः पुरे वसुमते मा त्वं भ्रमीर्मण्डन ।
मायामात्रमिदं जगद्धहु तथा स्वप्ने यथा दृश्यते ।
रज्जौ सर्पवदात्मनि प्रकृतिजो जीवभ्रमो भासते ॥ ३ ॥

आचार्यवाक्येन शिवोऽहमस्मि । ब्रह्मैव सत्यं सुखदुःखसाक्षि ।
एवं मनीषिन् द्रढिमानमद्य । गृहाण भेदप्रतिपत्तिमू ...॥ ४ ॥
लोकस्य लोके परदेवतागुरुः । न तत्समानो मनसाऽपि लक्षितः ।
देवा गुरौ कुप्यति नैव रक्षकाः । रुष्टेषु तेष्वेव यतो हि रक्षिता ॥ ५ ॥



इति पराशरिकिरिणः फणितिभक्किकामाकर्ण्य तीर्णविवर्णवर्णनार्णोऽतिपूर्णदुःशास्त्रार्णवः प्राजरीहृष्यत ॥

भो स्वामिन् शिवतातिना भवता[1] जातः सनाथो धियं ।
................................................................ ॥ ६ ॥

**(51b to 60 gap)**

**61a.** ...ब्रह्मेव सान्द्रानन्दः, ईश्वर इव सर्वमङ्गलाश्रितः, विष्णुरिव लक्ष्मीविहारतटाकः, विरिञ्चिरिव नानाविधवाणीविलासभूमिः, वसिष्ठ इव ब्रह्मोपवृंहण प्रवीणः, पराशर इव राधिकाशक्तिः, व्यास इवानन्तकृतिश्लाघनीयः शुक........ अत्रिरिवाऽनसूयासमर्चितः, अगस्त्य इव संप्रवर्धितदक्षिणाशः, मत्स्यावतारीव तरिःसमुज्जृम्भितकीर्तिमण्डलकवचितभुवनमहावालः, कमठ इव कठोरपरावथः, वराह इव समुदञ्चिस्थिरमहिमा नरकेसरीव सुमनःप्रह्लादावनायुक्तः वामन इव पादाक्रान्तसमस्तलोकमस्तकः भानुरिव मित्रपदाह्लादी, चन्द्र इव विबुधसत्तमसत्कृतामृतः ।..........................

**(61b gap)**

**62a.** चन्द्रोपलाञ्छितविशालगवाक्षभाक्षु ।
सौधेषु कर्मविबुधा विबुधा नवीनाः ।
ये संभरन्ति सुरसौविशङ्किनस्ते ।
स्त्रीणां निशाम्यनिमिषं व्यपयान्ति हन्त ॥ ७ ॥
स्त्रीणां निशान्तवलभीविहरत्कपोत– ।
पोतावधूतकलनिःस्वनपत्रतालम् ।
गीतं रतव्यतिकरश्रमहारि नित्य– ।
मुद्यानवासिसुरवासकसज्जिकानाम् ॥ ८ ॥
अमृतकिरणबिम्बं वर्त्मना सौधनीतं ।
युर्वातवदनशङ्की सम्यगाचुम्ब्य कामी ।
विरसमिति विजानन् किंचन ज्ञापनार्थं ।
व्यतनुत तदविद्भिर्दृश्यतेऽनेकधैव ॥ ९ ॥
कस्यामो...नवोढया विवशया क्रीडाविशेषक्रमात् ।
गावावक्षेन[1a] पथा समागमजुषः प्रालेयभानोर्हृदि ।
कालाञ्जीति धिया हिमांशुधरं ताम्बूल...तो ।
निष्ठ्यूतं शशमेणमङ्कमुदधेः पङ्कं च मुग्धा विदुः ॥ १० ॥
बिम्बोकरक्तमनसो जलमुक्कदम्बात् ।
बिम्बाधरा विपुलता विलसन्नितम्बाः ।
शम्पाश्चरन्ति भुवि काललटिनामपुर्या[2]– ।
मेवं वदन्ति रसिका मुदिता युवानः ॥ ११ ॥
........कलुषैर्यूनां प्रतस्थेषितुः । ...... ॥। १२ ॥

१. भगवता ? ।
१a. गावाक्षेन ? ।
२. कालटि° ? ।

अथाङ्गवङ्गकलिङ्गकोङ्कणसौराष्ट्रादिकोपवर्तनवर्तमानमनीयशः पटलपाटच्चर-मनीषाविशेषैस्तुलितशेषैः सुरेश्वरप्रभृतिभिः परिवृतः परीतः सनक इव सनन्दनरचितः, स्तनयित्नुरिव धृतकरकः, सोमेश्वर इव प्रभासङ्गतः, सहस्त्रकिरण इव महोदयालङ्कृतः, कुरुदेश इव सोमकलास्याभिरामः, दक्षिणामूर्तिरिव दर्पकोपहन्ता भगवान् विलक्षणक्षितिरुहलक्षणमाचान्तऋग्यजुषैः श्रोत्रियैस्तपस्विभिर्यशस्विभिरभिकैरपि सुचरित्रै र्विद्याधरैरपि सुमनोभिर्नवतन्तुकैरपि सप्ततन्तुकरैर्महाभिजनैर्जनैरनुदिनमुपसेय्यमानं बहुमानाश्रितमपि अवमानश्रितमर्जुननतमपि नतार्जुनं श्रीशैलमारुह्य पातालगङ्गापयसि सम्यगभिष्वानः सहसा भ्रमराम्बिकाप्रणयिनं मल्लिकार्जुनं नाम लिङ्गं स्तावंस्तावं प्रणम्यापरस्वयम्भुरिव कृष्णातीरमध्यासामास ॥ तत्र च—

पाषण्डपाशुपतगाणपतादयोऽथ ।
वादाहकं कतिपये कलयांबभूवुः ।
आचान्तशात्रवयशोभिरमुष्यशिष्यै– ।
रर्कांशुभिस्तिमिरवच्च जितादधाषुः ॥ १३ ॥
निर्मत्सराः कतिपये दान्ताः शान्ता मनीषिणः ।
अशिश्रयन्नमवरच्छङ्करं लोकशङ्करम् ॥ १४ ॥
अहं यूनां यूनामचरमतयाल्पाल्पमनसो ।
जिता मात्सर्यार्ता परपटव आचार्या... ।
(gap) ........................................ ।
........................................ ॥ १५ ॥
........................................ ।
........................................ ।

वाचोयुक्तिविकल्पकल्पितमतव्यत्यस्तराद्धान्तकं ।
ध्यायंध्यायमित पुरेव सुमते मा त्वं भ्रमीर्मण्डन ।

मायामात्रमिदं जगद्ब्रह्म[4a] तथा स्वप्ने यथा दृश्यते ।
रज्जौ सर्पवदात्मनि प्रकृतिजो जीवभ्रमोऽस्मि स्फुटम् ॥ १७ ॥
आचार्यवाक्येन शिवोऽहमस्मि ब्रह्मैव सत्यं सुखदुःखसाक्षी[3] ।
एवं मनीषिन् द्रढिमानमद्य गृहाण भेदाप्रतिपत्तिमुज्झ ॥ १८ ॥
लोकस्य लोके परदेवता गुरुः । न तत्समानो मनसाऽपि लक्षितः ।
देवा गुरौ कुप्यति नैव रक्षकाः। रुष्टेषु तेष्वेव यतो हि रक्षिताः[4] ॥ १९ ॥

३. क्षि ? ।
४. रक्षिता ? ।
४.a. जगद्बह्व ? । see st. 3.



इति पाराशरिकरिणः फणितिभक्किकामाकर्ण्य.......तीर्णविवर्णवर्णितदुःशास्त्रार्णोऽर्णवः प्राजरीहृष्यत ॥ ततश्च—

हे स्वामिन् शिवतातिना भगवता जातः सनाथोऽधुना ;
बुद्धिं मे कुहनावक्लृप्तनहनाद्वाक्याद्भ्रमीमीयुषीम् ।
दूरीकृत्य शुभंयुरस्मि तरसेत्यानन्दभारस्त्रुतैः ।
...तैरश्रुभिरङ्घ्रिपङ्कजमिव प्रक्षालितुं सोऽपतत् ॥ २० ॥
विद्योद्रेकपटीयसा सुयशसा शस्तैः परं यः स्तुत– ।
–स्तादृक्षं पतितं पुरो लगुडवत्संवीक्ष्य पाराशरी ।
प्रेमार्द्राद्रिहृदा सुरेश्वर इति व्याहृत्य नामान्तरं ।
कैनाशीं ककुभं क्रमेण.. (gap) ॥ २१ ॥

**॥ श्रीगुरुभ्यो नमः ॥ (ब)**

वन्देमहि भगवन्तं दुरहंकारदुर्लभं योऽयम् ।
वाणीविजित्वरत्वं सत्वरमधि केलिलब्धवान् शुद्धः ॥ १ ॥

अथ धार्मिकाणामग्न्याहितानामाखण्डलः शुभगार्हस्थ्यसुभगंकरणचन्द्रिकाश्वेतिमाडम्बरविडम्बनप्रियंभावुकभावुकोपवीतावलीढदृढकवाटफलकप्रतिपक्षलक्षणवक्षःस्थलस्फुरितस्फारविभूतिकैतवबहिःसरदखण्डब्रह्मवर्चसमण्डनः स मण्डनपण्डितोऽपि मार्तण्डमण्डलमिवाखण्डितोच्चण्डतेजोमण्डलं तमस्काण्डद्रोहिणं च तापसवतंसं परमसंहं वैहाहसपथविन्यस्तपदतया गगनारविन्दव्यवहारमपि सार्थयन्तं जीमूतमालामयं धूमस्तोमनिबरीसेनभसितकाषायचेलच्छलज्वलितकीलज्वलनायमानतया यत्र धूमस्तत्राग्निरिति व्याप्तिमप्याव्याप्तिदोषरहितीकुर्वाणं कदध्ववर्तिनो जनान् दण्डयितुमिव दण्डमपि मण्डयन्तं हस्ते घटमपि घटयन्तं तमायातमवलोक्य ससंभ्रममुपतिष्ठमानो यथाविधि पूजामुपारंसीत् ॥

तदनु भारती च कृतप्रणती रचितप्रतिभारतिं यतिपतिमिति प्रतिवदति स्म सव्रीलं विस्मयरश्मि पूरितमुखशर्वरी सखा ॥

भोः भोः परमहंससार्वभौम सर्वजनीनवृत्ते त्रैलोक्यत्रैस्वर्ग्यचातुराश्रम्यचातुर्वर्ण्यादिसृष्टिस्थितिहृतिकर्मनिर्माणशर्मदायिन् भगवन्–
ईशानः सर्वविद्यानामीश्वरः सर्वदेहिनाम् ।
ब्रह्मणोऽधिपतिर्ब्रह्मा भवान् साक्षात्सदाशिवः ॥ २ ॥

किं च,
अवाङ्मनसगोचरो मनसिजोदयद्वेषिणो
गुणत्रयनिरास्पदः सकलमङ्गलैकायनः ।
तथापि भगवान्[5] भवाञ्जगति हन्त लीलावश–
–श्चकार नृविडम्बनं यदिदमाततान प्रभो ॥ २अ ॥

५. भगवन् ? ।

जितौ यदावां भवता...[6]ते नौ तत्पर्यणंसीद्वहुभूतिहेतुः ।
इतीरयित्वाऽन्तरितं तदानीं तां पर्यणंसीद्वनदुर्गया सः ॥ ३ ॥

ततः सरसिजायनसदनाभिमुखी तिलकितमृगानाभिमुखं वाणी[7] । वाण्या समभ्यर्च्याऽत्मीयकीर्तिमाख्यापयितुमिदमाचख्ये ॥

हे देवि जगन्मातः सपदि मदर्थनया भवती त्रिभुवनेऽपि मामकीनविजयमभिदधती सज्जनानामभीष्टफलान्यपि ददती शृङ्गगिरिप्रभृतावाश्रमत्रये रात्रिंदिवसमपि सपर्यामापद्य निवसेति ॥ ततः—

देवी गिरां चतसृणां निसृणां पुरीणां ।
हन्तुर्हरस्य सहजा सहजातरूप्ये ।
वत्स्यामि शृङ्गगिरिमुख्यमठत्रयेऽह– ।
मादेशस्तव तथेति ययावुदीर्य ।[8] ॥ ४ ॥
तदनु जहृषुं नत्वा सभ्या विशारदशारदा ।
यतिरयमयोमा...तितो महानिति तुष्टुवुः ।
तदनु सवने दत्वा रित्थं समुत्थितकत्थनं ।
विरमितर्विधि भिक्षू चक्रे यथाविधि शङ्करः ॥ ५ ॥
सन्तोषतो बाष्पनिरुद्धकण्ठो । नमांसि भूयांसि वितन्यमान्यः ।
संन्यासमापद्य च सत्यवादी वैरङ्गिकोऽमंस्त गुरुं शरण्यम् ॥ ६ ॥
स्याच्चेदमुष्यवचनामृतसारलाभ– ।
सिद्धामृतोऽस्मि धनिनो हि धनाप्तिवादः ।
एवं सुधीनिरैंचिनोद्यतिराडुवाद[8] ।

(gap) ............................................

पश्चाद्विपश्चितममुं स्वयमुद्दिधीर्षुः ॥ ७ ॥
इदानीं किं कुर्मः क्व नु जगति मृग्याम कतरं ।
नरं वा पृच्छामः प्रसृमरशुचं को नुदति नः ।
दयाभावत्कीनः परकृतपरीहासवचसः ।
कथं पात्रीकृत्य प्रकटयति कौतूहलसृतिम् ॥ ८ ॥

इति चिन्ताकुलान्तःकरणतया शोचतः सतीर्थ्यान् सान्त्वयन् स तीर्थवरदेशीयः पद्मपादः शोकसलीलकरनौकां वाचमिति प्रादुर्भावयामास ॥

यूयं शुचा तमतमाद्य वृथा सखायो ।
देवासुरोरगनरादिशरीरगूढम् ।
द्रागादिदेवमिव तं मृगयाम हैनो ।
लभ्यो भवेद्भुवि दयामधिशायिचेताः ॥ ९ ॥

६. (य) ते ?
७. सुधीर्नि° ?
८. दण्ड not required



इत्याख्याय विख्यातसमाख्यः पाथोजचरणो गुरुचरणवर्ष्मणो रक्षणार्थं दक्षिणं कंचन निक्षिप्य तत्क्षणमेव मङ्क्षु प्रस्थितस्तरक्षुहर्यक्षक्षेलालक्षणां दक्षिणामाशां चक्षुषो लक्षीकृत्य क्ष्माभृतः क्ष्माभृतमरण्यादरण्यं ग्रामाद्गार्मं नगरान्नगरमन्विष्यान्विष्य वैणिकनैपुणहृद्भिः सुहृद्भिः सह [9]मन्दाकिनीमध्यविलसिदरविन्दसन्दोहनिष्यन्दमानमकरन्दबिन्दुवृन्दमन्दितगन्धवहसुगन्धिताधोरणीसमाघ्राणावतीर्णहर्षभरपरवशचलितविटपप्रतिच्छदननिषण्णमुनिजनानुभूयमानडोलोत्सववीक्षणहृष्टप्रत्यक्षीभूयऋभुक्षदर्शितेक्षणगलितहर्षाश्रुधाराजङ्घालितालवालमूलसालपटलावमानितमाघवनवनीं......................... (gap)

....कः स तयोपभोगी । भूपो भवेद्विचिनुमोऽद्य तमाशु देशे ॥ १० ॥
इत्याख्याय विधाय शङ्करगुरोः का...........।
ता जङ्वालो भुवि...विलङ्घ्य विषयान् मित्रैर्विचिन्वन् सह।
स्फारं कंचिदभूतवैभवनिधिं सस्याद्यैर्भस्वर ।
भूपेनामरुकेन प.......देशं स कैश्चिद्दिनैः ॥ ११ ॥
तत्रत्यादवगत्य पत्युरवनेर्वृत्तं निवृत्ताधयो ।
दूरेत्या वयमित्युपेत्य सरणिं गीत्या गिरन्तो गिरम् ।
आजग्मुर्नगरीं यदीयसदनं न्युप्तैन्दवग्रावणो ।
निर्यद्भिः सलिलैर्भजन्ति कलमाः काश्मीरदेशीयताम् ॥ १२ ॥
............................................................

(Incomplete).

९. विलसदर° ?